No. १५०५

Title चिन्तामणि टीकायां परामर्श टिप्पनी

Author ×

Extent २६ Age ×

Subject न्याय शास्त्रं

चिंतामणिटीकायां परामर्शटिप्पणी

१५०५

पत्राणि २८

निश्चयः

॥श्री॥ अनुमितिरूपं कार्यं कारित्वसंगत्या पक्षतानिरूपणानंतरमनुमितिहेतुत्वेन परामर्शं निरूपयति। पक्षधर्मस्येति।
पक्षधर्मस्य पक्षसंबंधस्य व्याप्तिविशिष्टज्ञानं व्याप्तिविशिष्टज्ञानं पक्षव्याप्तिविशिष्टोभयवैशिष्ट्यावगाहिज्ञानमिति
यावत् तदेवानुमितिहेतुरित्यर्थः। तेन पक्षविशेष्यकपरामर्शलिंगविशेष्यकपरामर्शयोरुभयोरपि संग्रहः। वह्नि
व्याप्यो धूमः धूमवान्पर्वत इति ज्ञानस्य मीमांसकनयेऽनुमितिजनकस्यासंग्रहः। पक्षतावच्छेदकावच्छिन्नविषयतानिरू
पितसाध्यव्याप्यत्वावच्छिन्नविषयताशालिज्ञानमेवानुमितिहेतुरिति तु समुदायार्थो निष्कर्षः। तथा च तादृशविषयता
शालिनिश्चयत्वमेवानुमितिकारणतावच्छेदकमिति भावः। यद्वा पक्षधर्मस्य। पक्षतावच्छेदकस्य। व्याप्तिविशिष्टज्ञा
ने। व्याप्यत्वावच्छिन्नविषयताशालिज्ञानं। पक्षतावच्छेदकस्येत्यत्र स्वावच्छिन्नविषयतानिरूपितत्वं षष्ठ्यर्थः। तस्य च व्याप्य
वच्छिन्नविषयतायामन्वयः। तथा च पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितव्याप्यत्वावच्छिन्नविषयताशालिज्ञानमे
वानुमितिहेतुरिति एवंरीत्या एवशब्दार्थः। यत्तु पक्षधर्मस्य। पक्षतावच्छेदकावच्छिन्नस्य। सप्तम्यर्थे षष्ठी। व्याप्तिविशिष्ट
ज्ञानं व्याप्तिविशिष्टप्रकारकज्ञानं पक्षतावच्छेदकावच्छिन्ने व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानमिति यावत् तदेवानुमि

चिं॰टी॰

तिहेतुरित्यर्थः नव्यनये पक्षतावच्छेदकावच्छिन्नविशेष्यक व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानस्यैवानुमितिहेतुत्वा
दितिवदंति तदसत् अग्रे लिंगविशिष्यकपरामर्शस्यापि हेतुत्वेन वक्तव्यत्वात्तदसंगतत्वापत्तेः । महाचार्यास्तु । ननु
आचांनये पक्षव्याप्तिविशिष्टोभयवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यताघटितमनुमिति
लक्षणं प्रागुक्तं तन्नासंभवि वह्निव्याप्यो धूमो धूमवान्पर्वत इति ज्ञानादप्यनुमितिस्तु स्यात्तेन रूपेणानुमितावहेतुत्वा
दित्यत आह । पक्षधर्मस्येति अयं भावः एवं चेदित्यनुमितिलक्षणोपयोगितया प्रकृतं ग्रंथमवतारयेति । गुरुः प्रत्य
वतिष्ठते । नन्विति । व्याप्यतावच्छेदकप्रकारेण । धूमत्वादिप्रकारेण । व्याप्तिस्मरणे । व्याप्तिनिश्चयत्वं विशिष्यस्मरण
त्वप्रवेशे व्याप्यनुभवादनुमित्यनुत्पादापत्तेः । पक्षधर्मताज्ञाने । व्याप्यतावच्छेदकप्रकारेण पक्षधर्मतानिश्चयत्वं धू
मत्वाद्यवच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वमिति यावत् । तथा धूमत्वाद्यव
च्छिन्नलिंगकानुमितिं प्रतिकारणतावच्छेदकं तथा च धूमत्वाद्यवच्छिन्नलिंगकानुमितिं प्रति धूमत्वाद्यवच्छिन्नविशेष्य
ताकव्याप्तिनिश्चयत्वं धूमत्वाद्यवच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वं च द्वयं हेतुत्वच

कत्ववत्कारणतावच्छेदकं। लिंगविशेषणकव्याप्तिज्ञानं च नानुमितिहेतुः न चैवमपि तस्मादनुमित्यनभ्युपगमादिति भावः। नि
रुक्तविषयताशालिनिश्चयत्वं नैयायिकाभिमतकारणतावच्छेदकमप्यस्मन्मते तत्कारणतावच्छेदकद्वयस्य कुत्रचित्प्राथ
मिकप्रत्यक्षोपस्थितत्वरूपलाघवादित्यर्थः। यत्र प्रथमं वह्निव्याप्यो धूमो धूमवान्पर्वत इति ज्ञानं ततः सिद्ध्यादिना प्रतिबंध
केनानुमितिसामग्रीविरहाद्वह्निव्याप्यधूमवान्पर्वत इति विशिष्टपरामर्शस्तत्रैव स्वप्रकाशवादिनां गुरूणां नये तदभिमत
[redacted]स्य कारणतावच्छेदकद्वयस्य नैयायिकाभिमतकारणतावच्छेदकमप्यस्य प्रथमं साक्षात्कृतत्वात्तदाश्रयाले
कस्य तत्प्रत्यक्षस्य प्रथममनुत्पन्नत्वात्। न चैवं यत्र प्रथमत एव वह्निव्याप्यधूमवान्पर्वत इति स्मरणात्मकविशिष्टपरा
मर्शस्तत्र नैयायिकासिद्धकारणतावच्छेदकस्यापि स्वप्रकाशवादिनां गुरूणां नये प्राथमिकप्रत्यक्षविषयत्वमस्तीति वाच्यं।
न्यायसिद्धकारणतावच्छेदकस्य गुरुमतसिद्धकारणतावच्छेदकद्वय व्याप्यतया स्वप्रकाशमर्यादया तत्रत्यस्य स्मरणस्यानुरम
तसिद्धकारणतावच्छेदकद्वयस्यावश्यं प्रत्यक्षासत्त्वेऽप्यनुमानतः। यदा कदाचित्प्राथमिकप्रत्यक्षविषयत्वस्य कारण
तावच्छेदकतायामविश्रामकत्वात्कल्पनालाघवं विनिगमकमाह। परामर्शहेतुत्वेनेति। न्यायनयेऽपि वह्निव्याप्यध

भवान्पर्वत इत्यादिविशिष्टपरामर्शस्यानुमितिं प्रति हेतुत्वेनेत्यर्थः। आवश्यकत्वादिति। अस्मदुक्तकारणतावच्छेदकद्वय
स्योभयवादिसिद्धानुमितिनियतपूर्ववर्तितावच्छेदकताकत्वादित्यर्थः। नैयायिकसिद्धस्यापि यथोक्तविशिष्टपरामर्श
स्याप्यस्मदुक्तकारणतावच्छेदकद्वयाक्रान्तत्वात् तथा च नैयायिकसिद्धकारणतावच्छेदकेऽन्यथासिद्धिनिरूपकत्व
नियतपूर्ववर्तितावच्छेदकत्वयोर्द्वयोः कल्पनामपेक्ष्य नियतपूर्ववर्तितावच्छेदकत्वेनोभयवादिसिद्धस्यास्मदुक्त
कारणतावच्छेदकद्वयस्यान्यथासिद्धिनिरूपकत्वमात्रकल्पने लाघवमिति भावः। यद्यपि न्यायनये वह्निव्याप्यवा
व्याप्रकारक न्पर्वत इत्यादिव्याप्यतावच्छेदकपरामर्शाधीनानुमितिः तत्र व्याप्यतावच्छेदकप्रकारकव्याप्तिनिश्चयाधीनत्वेन मी
मांसकमतसिद्धकारणतावच्छेदकस्योभयवादिसिद्धनियतपूर्ववर्तितावच्छेदकतया द्वयोः कल्पनेऽविशिष्टं तथापि म
तस्य ग्रन्थकृतैव वक्ष्यमाणत्वान्नासंगतिः। प्राचीनोक्तः परामर्शहेतुत्वेनेति। व्याप्यतावच्छेदकप्रकारकपक्षधर्म
तानिश्चयो यथा वह्निव्याप्यधूमवान्पर्वत इत्यादि नैयायिकाभिमतानुमितिकारणीभूतविशिष्टपरामर्शं प्रति जनक
त्वेनेत्यर्थः। आवश्यकत्वादिति। अस्मदुक्तकारणतावच्छेदकद्वयस्योभयवादिसिद्धानुमितिनियतपूर्ववर्तिताव

व्याप्तिनिश्चय व्याप्यतावच्छेदकप्रकारक ३

मिताः ष्टपरामर्शजनकत्वमितिवाच्यं

छेदकत्वादित्यर्थः। न च वह्निव्याप्यधूमवानित्यादिव्याप्यतावच्छेदकप्रकारकव्याप्तिनिश्चयस्य विशेषणतावच्छेदकादिप्रकार तस्याधि २४
कज्ञानविधया विशिष्टपरामर्शजनकत्वेऽपि धूमवान्पर्वत इत्यादिव्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयस्य विशेषण न २
तावच्छेदकादिप्रकारकज्ञानविधया [illegible] विशिष्टपरामर्शजनकत्वादिति वाच्यं। तदसत्त्वात् तथापि पक्षे लिङ्गवै
शिष्ट्यविषयत्वेन तद्भावेनाजनकतया तदवच्छिन्नस्यापि पतत एवं वह्नित्वासिद्धेः। वह्निव्याप्यधूमः पर्वत इत्यादिके वल
पर्वतत्वादिप्रकारकज्ञानादपि वह्निव्याप्यधूमवान्पर्वत इत्यादिविशिष्टपरामर्शसंभवात् इति ध्येयं। नन्वेवं तदुभ
यरूपेण कारणत्वं किं न स्यान्नमिसतत्र आह एवं चेति। ज्ञानद्वयोर्देवैस्यैव कारणेऽप्यपि नैयायिकसिद्धविशिष्टपरामर्शस्य
धूमो वह्निव्याप्यो धूमवांश्च पर्वत इत्येवंविधसमूहालम्बनज्ञानस्यापि चयथोक्तकारणतावच्छेदकद्वयाक्रान्तत्वादवधारणा
संगतेः। अत्र यथोक्तव्याप्तिपक्षधर्मतयोर्वैशिष्ट्यावगाहिनिश्चयत्वमनुमितिजनकतावच्छेदकं न वा तादृशनिश्चयासमा
नकालीनवह्निव्याप्यधूमो धूमवान्पर्वत इति ज्ञानमनुमित्युपधायकं न वेत्यत्र यो विप्रतिपन्नः। व्याप्तिविशिष्टवैशि
ष्ट्यावगाहिनिश्चयस्यैवानुमितिहेतुत्वमिति निर्णये व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वमनुमितिजनकतावच्छे

दर्शनेत्यपि विप्रतिपत्तिं संभवति। यथा वह्निव्याप्यधूमवानयमिति ज्ञानमनुमित्युपधायकं न वेति तु न विप्रतिपत्तिः
परनयेपि तादृशज्ञानादनुमित्युत्पत्तेरिति ध्येयं। व्याप्यत्वज्ञानमेवेति। व्याप्यत्वावच्छिन्नविषयताशालिनिश्चय एवे
त्यर्थः। लाघवात्। कारणतावच्छेदकलाघवात्। आवश्यकत्वाच्चेति। परनयेपि तादृशविशिष्टविषयताशालिनि
श्चयस्यानुमितिनिरूपितहेतुत्वावश्यकत्वाच्चेत्यर्थः। उपनीतत्वाच्चेति क्वचित्पाठः। तत्र तादृशविषयताशालि
निश्चयस्य परनयेप्यनुमितिं प्रति कारणत्वाच्चेत्यर्थः। अनुमित्युत्पत्तेरव्यवहितपूर्वं तादृशविशिष्टविषयिताशा
लिनिश्चयत्वमपि नास्तीति भ्रमेणा दूषयति। तस्येति। तादृशविषयिताशालिनिश्चयस्येत्यर्थः। एवं। अव्यवहितपू
र्वं। असिद्धेः। असत्त्वेन। युगपदुपस्थित्यभावादिति। एकस्मिन्क्षणे अव्यवहितपूर्वत्वकालिकविशेषणतया अनुमितिताद
शविषयिताशालिविशिष्टपरामर्शयोरुपस्थित्यभावादित्यर्थः। तथा च यदा अव्यवहितपूर्वत्वसंबंधेन कार्यं तदा कालिक
संबंधेन कारणतावच्छेदकावच्छिन्नमित्यन्वयसहचारज्ञानस्य कारणताग्राहकस्याभावात्कारणताग्रहासंभव इति
भावः। केचित्तु। व्याप्यत्वज्ञानमेवेति। व्याप्तिप्रकारकज्ञानमेवेत्यर्थः। एवकारेण व्याप्यतावच्छेदकावच्छिन्नविशेष्य

स्य श्री

तानिरूपितत्वं प्रकारताविशेषतास्पव्यवछेदः। लाघवादिति व्याप्यतावछेदकावछिन्नविशेष्यतानिरूपितव्याप्ति
प्रकारताशालिनिश्चयत्वमपेस्य व्याप्तिप्रकारकनिश्चयत्वस्यावछेदकस्य लघुत्वादित्यर्थः। कल्पनालाघवमाह। आ
वश्यकत्वाच्चेति। व्याप्यतावछेदकावछिन्नविशेष्यतानिरूपितव्याप्तिप्रकारताशालिनिश्चयत्वावछिन्नस्य नियतपू
र्ववर्त्तित्वे व्याप्तिप्रकारकनिश्चयत्वावछिन्नस्य नियतपूर्ववर्त्तिताया आवश्यकत्वाच्चेत्यर्थः। उपजीव्यत्वाच्चेति पा
ठे व्याप्तिप्रकारकनिश्चयत्वावछिन्नस्य व्याप्यतावछेदकावछिन्नविशेष्यतानिरूपितव्याप्तिप्रकारताशालिनि
निश्चयत्वावछिन्नव्यापक[illegible]त्वादित्यर्थः। तथा च नियतपूर्ववर्त्तित्वमुभयसिद्धत्वमिति भावः। स्यात्कृतः तत्समतत्वस्य सा
ध्यदूषणासंगतेः। अनुमितेः एवं व्याप्तिप्रकारकज्ञानस्यानुभयवादिसिद्धत्वादिति ध्येयं। अनुमितित्वव्यवहित एवं तादृ
शविशिष्टविषयताशालिनिश्चयस्यासिद्धिं परिहरति। अथेति वह्निव्याप्यधूमस्मरण इति। धूमवान्पर्वत इति ज्ञाने च
ति शेषः। धूमतासामानाधिकरण्येनेति। धूमस्वरूपव्याप्यधर्मदर्शनादित्यर्थः। एतच्च संशयोत्तरप्रत्यक्षाभिप्रायेण। व्याप्यायमिति
अनुमितित्वव्यवहित एवं वह्निव्याप्यधूमवान्पर्वत इत्याकारकनिरुक्तविषयिताशालिनिश्चयात्मकः समूहालंबना

वह्निव्याप्याभिन्ना[illegible]मवान् इत्याकारक
प्रतिशेषः।१८

२

५

चिं॰टी॰ त्मकोऽभेदप्रत्ययस्यादित्यर्थः। सामान्याभावत्वादिति। अभेदप्रत्ययसामग्रीवत्तादृशविषयिताशालिनिश्चयस्या
पि सामग्र्यावर्तमानत्वादित्यर्थः। स एवानुमितिहेतुरिति· एवकारेणापूर्वोः। सोऽप्यनुमित्यव्यवहितएववर्तीत्यर्थः।
यद्वा एवकारो भिन्नक्रमः सोऽनुमित्यव्यवहितएववर्त्यैवेत्यर्थः। व्याप्याभेदप्रत्यय इति· तादृशविषयिताशालिनिश्च
यात्मकोऽभेदप्रत्यय इत्यर्थः। अन्यथाऽनुमितिसामग्र्याबलवत्त्वाभावे तत्र नैयायिकस्य। स्मरतेरिति। पर्वताद्युल्लेख
त्स॰१ लशालिनवतन्मतिविशेषः। प्रथमतएवेति। अनुमित्युत्पत्त्यव्यवहितएवमेवेत्यर्थः। भासते। पर्वतांशविशेषणीभूते धूमभा
सते। आप्तवाक्यादिति। वह्निव्याप्यधूमवान्पर्वत इतिस्मरणादित्यपि बोध्यं· तत्रोभयत्रापीति। अव्यवहितएवेत्यका
लिकविशेषणत्वाभ्यामनुमितितादृशोविषयिताशालिनिश्चययोरन्वयसहचारज्ञानसत्त्वादितिशेषः। लाघवादिति·
अवच्छेदकेलाघवादित्यर्थः· न्यायनयेवह्निव्याप्यवानयमित्यादिव्याप्यतावच्छेदकप्रकारकप्रत्यक्षादिपरामर्शोदय
यत्रानुमितिस्तत्रव्याप्यतावच्छेदकप्रकारकव्याप्तिनिश्चयाद्यभावेनतत्परामर्शकारणतावच्छेदकहेतुपरामर्शेऽप्युभयसा
ध्यसिद्धनियतएवेववर्तितांकतयाकल्पनागौरवविरहाच्चेत्यपि बोध्यं। एतत्सूत्रनाशेषयत्रचाप्तवाक्यादित्यपि एवमुक्ते
वच्छेद[illegible]२

पक्षधर्मस्य व्याप्यत्वज्ञानस्येति। पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितव्याप्यत्वावच्छिन्नविषयताशालिनिश्चय
त्वं स्येत्यर्थः। हेतुत्वकल्पनात् हेतुतावच्छेदकत्वकल्पनात्। अन्यत्रापीति वह्निव्याप्यो धूमः धूमवान् पर्वत इत्यादिज्ञा
नान्तरेऽपि अनुमितिसत्त्वापीत्यर्थः। नचेति अनुमितिसामग्र्यभावेन तादृशज्ञानाव्यवहितोत्तरोत्पन्नस्य तादृशविषयता
शालिनिश्चयस्यैवानुमितित्वोपधायकत्वमित्यर्थः। लिंगे पक्षलिंगे पक्ष[redacted]म यस्मिन्। प्रत्यक्षविशिष्टज्ञानेति।
साध्यव्याप्यो हेतुः हेतुमान् पर्वत इति ज्ञानोत्तरं प्रात्यक्षिकतादृशविषयताशालिनिश्चयसामग्र्या विरहादित्यर्थः।
तेन विना तादृशविषयताशालिनिश्चयत्वेन विना। अनुमित्यनुत्पादेति। इष्टापत्तौ चानुभवविरोधादिति भावः।
अनुमानादिति पक्षीयधूमो वह्निव्याप्यः धूमत्वादित्यनुमानादित्यर्थः। आदिपदाच्छब्दसंस्कारादिपरिग्रहः। परामर्शः॥
साध्यव्याप्यो हेतुः हेतुमांश्च पक्ष इति ज्ञाने द्वयाद्यव्यवहितोत्तरे तादृशविषयताशालिनिश्चयः। अनवस्थानादि
ति व्याप्तिप्रकारकज्ञानादेरपि तदानीं धर्मिमावस्थानं नियमादित्यर्थः। किंचित्तु अनवस्थानादिति तदानीं धूमस्यासन्नि
कृष्टत्वेन धूमत्वस्याप्यसंनिकृष्टतया विनानुमानं विशिष्टप्रत्यक्षासंभवेनानवस्था प्रसंगादित्यर्थमाहुः॥

व्याप्ति

५ प

सिं॰ टी॰

४

३३

बहिरस्वतंत्रेणापीति। बहिरिंद्रियासहकारेण यावद्विषयकलौकिकप्रत्यक्षजनकता तदनाश्रयेनेत्यर्थः। स
हकारित्वस्य भेदगर्भतया घ्राणादावेव तादृशजनकताप्रसिद्धा। घ्राणादेरपि मनःसहकारिण जनकत्वादप्रसिद्धि
वारणाय बहिरिंद्रियविशेषणं। मनसोपि बहिरिंद्रियासहकारेण सुखादिप्रत्यक्षजनकत्वाद्बहिर्विषयकत्वं
प्रत्यक्षविशेषणं। निष्प्राणेति। निष्क्रमनःसंयोगान्निष्प्राणेहापीति इंद्रियासंनिकृष्टातींद्रियलिंगपक्षस्थलेपीत्य
र्थः। साध्यव्याप्यो हेतुः हेतुमान् पक्ष इति ज्ञानानंतरमिति शेषः। ज्ञानानंतरोपनीत इति हेतुमान् पक्ष इति ज्ञानोपनीत
विशेष्य इत्यर्थः। व्याप्तिस्मरणेति। साध्यव्याप्यो हेतुरिति व्याप्तिस्मरणेत्यर्थः। परामर्शः। साध्यव्याप्यहेतुमान् पक्ष
इति निरुक्तविषयताशालिज्ञानस्य निश्चयः। तदनंतरमिति साध्यव्याप्यो हेतुर्हेतुमान् पक्ष इति निश्चयानंतरमित्य
र्थः। व्याप्तिस्मरणादेरिंद्रियसंनिकृष्टलिंगाविशेष्यकप्रकृतव्याप्तिस्मरणादेः प्रमाणांतरतापत्तेरिति पक्षाविशे
ष्यकतादृशव्याप्तिविशिष्टलिंगप्रकारकप्रमायाः करणत्वापत्तेरित्यर्थः। अंतरपदस्य स्वरूपार्थकत्वात् एवमग्रेपि। एतेन
प्रमाणांतरत्वं न प्रत्यक्षादिचतुष्टयभिन्नप्रमाणत्वं अप्रसिद्धेः। नापि तच्चतुष्टयभिन्नत्वे स्वप्रमाणापदत्वे इंद्रियादौ मूलवै

के२ त्वमात्रं।

प्तिरूपापत्तेः। नापि प्रमाणांतरत्वं प्रमाणत्वमेव व्याप्तिज्ञानस्यानुमानात्मकत्वादिरूपापत्तेः। प्रमाजनकत्वोक्तावपि विशिष्टप
रामर्शात्मके प्रत्यक्षप्रमायामनुमितिप्रमाणत्वापत्तेः। अत एव प्रमानसाधारणं प्रमितिकरणत्वमपि न तत्र अनुमिति
मात्रेऽव्याप्तेः। नापि मानसप्रमित्यजनकत्वे नियतव्यापारभावेन प्रमायामकरणत्वादित्ययं प्रसिद्धान्तासंगतेरिति
प्रसक्तेः। आपत्तिबीजभूतां व्याप्तिं दर्शयति। तदेव हीति। हि यस्मात् यदसाधारणसहकारी यत्साधर्म्यमनो बहिरिंद्रियं वा
मनःसहकृतं तदेव प्रमाणांतरमिति। यद्वा यद्यार्थविशेष्यक यत्प्रकारिकां प्रमां प्रत्यक्षप्रमां जनयति तत्सर्वं तद्धर्मविशेष्यकत
त्प्रकारकप्रमायाः कारणं भवतीति योजना। एवकारस्य साफल्यार्थकत्वात् तथा च यद्वा यद्यार्थविशेष्यकयत्प्रकारकप्रत्यक्ष
प्रमितेर्मनोऽन्यासाधारणकारणं भवति तत्तद्धर्मविशेष्यकतत्प्रकारकप्रमायाः कारणं भवतीति व्याप्तिशरीरं सहकारि
त्वमेदगर्भतया मनोऽन्यत्वलाभः प्रमापदस्य प्रत्यक्षपरतया प्रत्यक्षलाभः। इष्टापत्तिवारणाय पदं चक्षुः परं आदिपदात्त्व
गादिलाभः। अत्र करणत्वस्यासाधारणजनकताघटितत्वेन ममापि शरीरमात्रैककालदिग्घटितव्यभिचारवारणाय मनोऽन्यासाधा
रणेति। तादृशप्रमितेर्मनोऽन्यासाधारणकारणत्वं वतादृशप्रमितित्वस्यानुभवत्वव्याप्यजात्यवच्छिन्नकार्यता निरूपि

6

चि. टी.

तानधारयाम्यैलेतानानांपौर्वापर्यवारणाय षण ३ पु २

ततादात्म्यसंबंधानवच्छिन्नकारणतात्रयत्वे सति भिन्नोऽन्यप्रमाणांतरासहकारित्वं सत्यंतोपादानादेवजन्यज्ञानत्वाव
च्छिन्नजनकस्य शरीरात्मादेः कार्यत्वावच्छिन्नजनकस्य कालदिगादेः विशिष्टवैशिष्ट्याभावत्वावच्छिन्नजनकस्य विशेषणताव
च्छेदकप्रकारकज्ञानादेर्व्युदासः तत्तद्व्यक्तित्वेन कार्यकारणभावमादाय विशेषणतावच्छेदकप्रकारकज्ञानादावतिप्रसंगवार
पर्याप्तिनिवेश्य णाय तत्र जातिपदं तत्त्वावच्छिन्नत्वं च तन्निष्ठावच्छेदकत्वमात्रं न तु तस्य यावदवच्छेदकताकत्वं तेन पक्षीभूतव्याप्तिस्मरणा
देः तत्[illegible]प्रकारकप्रत्यक्षत्वावच्छिन्नजनकत्वेऽपि न न्यायनये स्वरूपासिद्धिः। न चापक्षे स्वरूपासिद्धिर्न प्रतिकूलेति
वाच्यं। तथा सत्यापाद्याभावेनापादकाभावसाधने सिद्धसाधनापत्तेः आपाद्याभावेनापादकाभावसाधन एवा
स्य तात्पर्यात्। तादात्म्यसंबंधानवच्छिन्नत्वोपादानात् विषयत्वेन लौकिकप्रत्यक्षत्वेन संख्यादिलौकिकप्रत्यक्ष
त्वेन संख्यादित्वेन कार्यकारणभावमादाय संख्यादिलक्षणविपक्षेण व्यभिचारः। न च तदपि प्रमाकारणं भवत्येव
विशिष्टप्रत्यक्षजनने निर्विकल्पकस्य व्यापारत्वादिति कुतो व्यभिचार इति वाच्यं। तथापि निर्विकल्पाजनकवि
षये व्यभिचारस्य दुर्वारत्वात्। निर्विकल्पकादिकमजनयित्वैव साक्षात्तद्विशेष्यकतत्प्रकारकचाक्षुषादिजनकच

तत्तद्विषयत्वेलौकिकप्रत्यक्षत्वेन तत्तद्व्यक्तित्वेन.

स्तुः संयोगादिव्यक्तिविशेषे व्यभिचारवारणाय विशेषणद्वलं नद्यर्थं तदर्थं च मनोभिन्नप्रमाणजन्यत्वे सति प्रत्यक्षत्व
व्याप्यजात्यवच्छिन्नकार्यतानिरूपितकारणतानाश्रयत्वं तच्च शरीरादिसाधारणं अतो न सत्यन्तदलवैयर्थ्यं
चक्षुरादेरपि मनोरूपप्रमाणजन्यवृत्तिचाक्षुषत्वाद्यवच्छिन्नं प्रतिजनकत्वात् स्वात्मकप्रमाणजन्यवृत्तित्तद
वच्छिन्नं प्रतिजनकत्वाच्च दृष्टान्तासिद्धिवारणाय मनोन्यत्वं स्वभिन्नत्वं च प्रमाणविशेषणं न च तथापि चक्षुरालो
लोकाद्यात्मकप्रमाणजन्यवृत्तिचाक्षुषत्वावच्छिन्नं प्रतिजनकत्वादसिद्धिर्दुर्वारैव स्वभिन्नप्रमाण[illegible]त्वेन नच
नुभवत्वव्याप्यजात्यवच्छिन्नत्वं च तादृशजातिपर्याप्तावच्छेदकताकत्वं । अनुभवत्वव्याप्यजात्यवच्छिन्नकार्यताप्रति
योगिकत्वावृत्तिकारणताश्रयत्वं । आलोकादिश्च न तथा लौकिकचाक्षुषत्वादेरेव तत्कार्यतावच्छेदकत्वादिति वा
च्यं । द्रव्यवृत्तित्वादिविशिष्टलौकिकविषयताप्रत्यासत्त्या सत्या चाक्षुषस्यैव तत्कार्यतावच्छेदकत्वादिति चेन्न । अनु
भवत्वव्याप्यजात्यवच्छिन्नलौकिकविषयतावच्छिन्नकार्यताप्रतियोगिकत्वावृत्तिकारणताश्रयत्वस्य स्वभिन्न
प्रमाणपदेन विवक्षितत्वात् । चक्षुरादेः सामान्यतः चाक्षुषत्वाद्यवच्छिन्नं प्रत्येव जनकत्वात्तादृशप्रमाणत्वसंभवः ।

समवायेन चाक्षुषत्वावच्छिन्नं प्रति स्व
[illegible] आत्मनिष्ठप्रत्यासत्तिर्न तु विषयनिष्ठप्रत्यासत्तिः तथा च तादृशकार्य
तायां लौकिकविषयता[illegible]त्वं न क्षतमेव

प्रत्यक्षत्वव्याप्यजात्यवच्छिन्न

सा न४ रविलेर

चिं. टी. एकस्यैव सुरादिव्यक्तेः तादृशकारणताश्रयवस्तुरादिव्यक्त्यंतरजन्यवृत्तिकार्यताप्रतियोगिककारणताश्रयत्वादसि
द्धितादवस्थ्यवारणाय स्वभिन्नत्वं तादृशकारणतायां विशेषणमपहाय [illegible] कारणताविशेषणं शरीरादिसाधारणका
स्वं रणभावाय द्रव्यत्वेन जन्यसत्त्वेन कार्यकारणभावमादाय चासिद्धितादवस्थ्यवारणाय तु नव त्वव्याप्यजात्यव
च्छिन्नं स्वभिन्नप्रमाणत्वघटककार्यताविशेषणं न च तथापि कालत्वेन कार्यत्वेन द्रव्यत्वेन जन्यसत्त्वेन कार्य न४
कारणभावादिकमादाय वस्तुरादिजन्यज्ञानस्यापि सामान्यरूपनिरूप्यस्वाभिन्नप्रमाणजन्यत्वादसिद्धिताद
वस्थ्यमिति वाच्यं द्रव्यावृत्तित्वेन जन्यताविशेषणात् पसीमतेव्याप्तिस्मरणादेरूपनयस्यापि तद्धेकारकप्र तज्याम
त्यक्षत्वावच्छिन्नं प्रतिजनकतया वस्तुरादिप्रमाणांतरजन्यवृत्तिकार्यतानिरूपितकारणताश्रयत्वा [illegible] न य४
कालत्वेन कार्यत्वेन जन्य द्रव्यत्वेन कार्यकारणभावमादाय वस्तुरादेरपि त्वगादिप्रमाणांतरजन्यवृत्तिकार्यताप्रतियोगि
श्री ८ ककारणताश्रयत्वोद्धृतोऽसिद्धिः तस्य वारणाय प्रत्यक्षत्वव्याप्यजात्यवच्छिन्नो भासत्कारिताघटककार्यतावि
शेषणं प्रत्यक्षत्वव्याप्यत्वं च प्रत्यक्षनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वे सति प्रत्यक्षवृत्तित्वं तेन पसीम प्रत्यक्षवृत्तिविद् प्रत्यक्षतेन

जन्यसत्वेन त्व

मपमर
ताधा

तद्व्याप्तिस्मरणादेरपि परामर्शप्रत्यक्षात्मकनिरुक्तस्वभिन्नप्रमाणाजन्यवृत्ति अनुमितित्वावच्छिन्नकार्यतानिरू
पितकारणताश्रयत्वेऽपि नस्वरूपासिद्धिः। नापि स्वभिन्नप्रमाणत्वघटकअनुभवत्वव्याप्यजात्यवच्छिन्नत्वं
ताह वा तादृशजातिपर्याप्तावच्छेदकत्वं वक्तव्यं। परामर्शादेः कार्यता च न तथा एवं च प्रत्यक्षवृत्तित्वं नोपादेयं। किंतु
तादृशजात्यवच्छिन्नत्वं मुख्यविशेष्यताविधया समवायसंबंधेन तादृशजात्यवच्छिन्नत्वं वक्तव्यं। तेन व्याप्तिस्मर
णादेरपि कार्यतावच्छेदककोटिप्रवेशसत्त्वन्यूनवृत्तिधर्मत्वादेः प्रवेशेऽपि नासिद्धिः स्वभिन्नप्रमाणत्वघटककार
णतायां स्वावृत्तित्वविशेषणादेव व्याप्तिज्ञानादिव्यक्त्यंतरजन्यानुमितिव्यक्तिमादाय नासिद्धिः तथापि महत्त्वव्याप्ति नच
वारः प्राचीननये द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्ने द्रव्यवृत्तित्वविशिष्टलौकिकविषयतादिसंबंधेन प्रत्यक्षत्वाव
च्छिन्नेवा जनकतयानिरुक्तासहकारित्वादिति वाच्यं। तन्मताभ्युपगमे साधारणकारणतायां सत्यं तद्रूपेतादात्म्य
संबंधानवच्छिन्नत्ववत्महत्त्वावृत्तित्वनापि कारणतायाविशेषणीयत्वात्। न च तथापि उद्भूतरूपव्यभिचारः। तस्य
आत्मवारणाय मानसेतरद्रव्यलौकिक[redacted]त्वावच्छिन्नजनकतयानिरुक्तासहकारित्वादिति वाच्यं। तस्य लाघवेन द्रव्यलौकिक

प्रत्य त्ववृ

चाक्षुषत्वावच्छिन्नं प्रत्यक्षजनकत्वात् मीमांसकेन पूर्वपक्षिणा वा पारम्परिकप्रत्यक्षत्वाभ्युपगमात् नैयायिकन-
येन महत्त्वावृत्तित्ववद्रूपावृत्तित्वस्यापि सत्यंतदले कारणतायां प्रवेशनीयत्वात् मनःसंयुक्तसमवायादिलक्षण-
सुखादिसन्निकर्षस्यापि मनोन्यप्रमाणान्तरासहकारित्वात् तत्र व्यभिचारवारणाय बहिःस्यमर्षे विशेषणं मेयं
मानसे लौकिकप्रत्यक्षाविषयत्वे परत्वेनज्ञानलक्षणादेवसन्निकर्षे [redacted] तथास्तु खादिप्रत्यक्षे बहिःस्थस्य क-
विभावनान्न [redacted] व्यभिचारतादवस्थ्यं परामर्शादेरभावेनानन्त्वाद्यवच्छिन्नस्य निष्ठकारणतानुपपत्त्या व्याप्ति-
ज्ञानादेरेव सहकारितया तत्र व्यभिचारवारणाय सामान्यतो ज्ञानत्वादिकमपहाय प्रत्यक्षप्रमितित्वेन प्रवेशः।
विपरीतज्ञानोत्तरप्रत्यक्षं प्रति विशेषदर्शनादेः कारणत्वमपि तु विपरीतज्ञाननिवर्तकतया कथंचिदुपयोगि-
त्वमेव तस्य तेन तत्र व्यभिचार इति सर्वं चतुरस्रं केचित्तु। व्याप्तिस्मरणादेः प्रकृतव्याप्तिस्मरणादेः प्रमाणान्तरता-
पत्तेरिति प्रत्यक्षविजातीयविशिष्टपरामर्शरूपप्रमाकरणतापत्तेरित्यर्थः। तदेवाहेत्यादि यस्मात् यदसाधा-
रणं मनोरूपं सहकारि साध्यबहिर्गोचरां प्रमां जनयति तदेव प्रमाणान्तरमिति सर्वं प्रमाणान्तरमिति योऽस

त्य ८

ना यद्विसाधनविशेषणं असाधारणं यज्जातीयप्रमासामग्र्यसमवहितं मनोरूपं सत्कार्यं साध्येति स्वरूपक

वाहि॥ थनं पूर्वोपरगोचरां प्रमां यद्विशेष्यकयत्प्रकारकप्रमा प्रमाणांतरं तद्विशेष्यकतत्प्रकारकप्रमाकरणं तद्विजातीय

यत् तथा च यज्जातीयप्रमासामग्र्यसमवहितं सत् यद्विशेष्यकयत्प्रकारकप्रमाजनकं भवति तत्तद्विजातीय

तद्विशेष्यकतत्प्रकारकप्रमाजनकं भवति यथा चक्षुरादिकं अनुमानादिविजातीयप्रमासामग्र्यसमवहि

तं सत् घटादिविशेष्यकघटत्वादिप्रकारकं प्रमाजनकं भवति अनुमानादिविजातीयप्रमाजनकमपि । ताहश ५

घ भवतीत्येवं निष्कृष्य यावच्छरीरं प्रकृते व्याप्तिस्मरणमपि यदि प्रत्यक्षजातीयप्रमायां लौकिकसंनिकर्षा

त्मकसामग्र्यसमवहितं सद्विशिष्टपरामर्शरूपप्रमाजनकं स्यात्तदा प्रत्यक्षविजातीयता दृश प्रमाजनकं प्रत्यक्षात्वति

स्यात् सामग्री चाभयवादिसिद्धत्वेन विशेषणीया तेनोपनयसंनिकर्षमादाय सिद्धिः । परं नूपे उपनयस्य ना२

संनिकर्षत्वाभावात् इति व्याचक्षुः । तद् असत् इंद्रियत्वव्यापाराभावेन प्रमायाम् करणत्वादित्यर्थासिद्धांतासं

गतेः । प्रमाकरणत्वस्यापा[illegible]त्वाभावात् । न प्रत्यक्षविजातीयविशिष्टपरामर्शकरणत्वमेवोपादनीयं

घ

(त्र्यमनसेति द्रा २)

त्वितिः ८

व्याप्तावपि साध्ये कारणत्वमिव निवेशनीयमिति वा ध्येयं। अनुमानादिजातीयप्रमासामग्रीमादाय चक्षुःसंयोगादौ
व्यापारे व्यभिचारापत्तेरिति दिक्। ननु प्रागुक्तं संशयत्वप्रजनके निद्रादिजन्यपदार्थोपस्थितिरूपोपनय
संनिकर्षे [illegible]नियमो व्यभिचारितो यावत्कारणत्वमुक्तं जन्यपदार्थोपस्थितिरूपोपनयसं[illegible]त्वादि
त्यत आह। एवं संशयत्वं प्रागुक्तसंशयत्वं नोचत्विति सम्यक्। न प्रमेयत्वमविशिष्टप्रत्यक्षरूपो किंतु स्मरणादिरूपो
धर्मिज्ञानविशेषणज्ञानरूपो विशेषणविशेष्ययोर्लौकिकसंनिकर्षसत्त्व एव तयोः प्रत्यक्षरूपत्वादिति भा
वः। निद्रेः निद्रादिजन्यपदार्थोपस्थितेः न प्रमाणांतरत्वेन विशिष्टप्रत्यक्षप्रमितेरसाधारणकारणत्वं त
थापि हेतुत्वाभावादेव न व्यभिचार इति भावः इति संप्रदायः। सेऽवस्तु नन्वेतादृशनियमोपगमे निद्रादेरपि प्र
माणांतरतापत्तिः [illegible]निद्रादिजन्यपदार्थोपस्थितेरपि संशयत्वप्रकरणत्वापत्तिरित्यत आह। संशयेति न
प्रमाणांतरत्वेन प्रमाणांतरत्वप्रसंगः। न संशयत्वप्रकरणत्वप्रसंग इति यावत् शेषमेवं वदिष्याहुः। तदु
भयमप्ययुक्तं संशयस्य नैतु न प्रमे[illegible]त्वाभिधानस्यानुपपन्नत्वापत्तेः। निद्रादिजन्यपदार्थोपस्थितेर्न सं

शयस्य भ्रमासाधारणकारणत्वमित्यस्यैव वक्तुमुचितत्वात् तन्मये ज्ञानलक्षणासंनिकर्षस्य प्रत्यक्षाजनकतयात
योर्विशिष्टप्रत्यक्षंप्रत्यपि निद्रादिजन्योपस्थितिस्तदसाधारणकारणत्वासंभवात्। वस्तुतस्तु ननु भ्रमे
ऽपि संशयस्य भ्रमस्थले बहिरिंद्रियलौकिकसंनिकर्षं विनापि बाह्यार्थविषयकविशिष्टप्रत्यक्षजनने स्वभ्रमा
तेपि१ त्कि केन मनसा प्रवृत्तेन विना विशिष्टप्रत्यक्षजनने यत् तु न वारणीयं [illegible] सामग्रीकार्यं नार्ज व्यमिति
विष्यति। न बहिरिंद्रियव्यापारं विना मनसा बाह्यार्थकविशिष्टप्रत्यक्षजनने दोषस्य सहकारितया प्रवृत्ते स
ते न विना दोषाभावादेव न विशिष्टप्रत्यक्षजननसंभव इति वाच्यं। दोषं विना स्वतः संयोगवान्न वेत्यादिकोटिद्वय
प्रमारूपसंशयजनने दोषस्य व्यभिचारादित्यत आह। संशयेति लौकिकसंनिकर्षाजन्यसंशयस्य भावि
त्यर्थः। न भ्रमे न विशिष्टप्रत्यक्षरूपो किंतु स्मरणाद्यात्मकधर्मिज्ञानविशेषणज्ञानरूपो। निद्रादिरिति पंच
मीनिद्रादिसहकारादित्यर्थः। प्रमाणांतरत्वं मनसः प्रमाणं मनसा बहिरिंद्रियालौकिकसंनिकर्षं विना बा बहिरिंद्रियव्यापारः
विषयके१ ह्यार्थविशिष्टप्रत्यक्षकारणत्वमिति यावत्। यद्वा निद्रादिरिति यस्य निद्राविशिष्टमनःसंयोगः तस्यादिः कारणमिति स्पष्टत्वात्॥
समवायिकारणं

सिं. टी. नसहत्यर्थः। न चेति। इन्द्रियासंनिकृष्टे धूमे स्मृतिशेषः। तत्रापीति सधूमो वह्निव्याप्य इति विशिष्टस्मरणाद्य
भावदशायामितिशेषः। तद्व्याप्यत्वानुभावकेति तद्धूमे वह्निव्याप्यत्वानुभावक[illegible]भावादित्यर्थः। मानसस्य
त्वया ऽनंगीकारात् विशिष्टव्यवहारं प्रति विशिष्टज्ञानस्य हेतुत्वादिति भावः। व्याप्यत्वानुभवादिति स्व
रूपतो धूमत्वादौ वह्निव्याप्तिव्याप्यत्वस्मरणस्य धूमत्वत्वादिना तद्धूमे धूमत्वादिमत्तास्मरणस्य च सत्त्वा
त् यद्यपि न तादृशास्मरणं तदा अत्र संसर्गाग्रहोऽस्त्वेवेति भावः। न च त्वन्मतेऽपि इति। वह्निव्याप्तिव्याप्यधूमत्व
पक्षीयधूमः वान् सधूमश्च वह्निव्याप्तिव्याप्यधूमत्ववांस्तद्धूमे विशिष्टस्मरणाद्यभावात् तद्धूमस्यासंनिकृष्टत्वेन च प्रात्यक्षिक इति
तादृशविशिष्टपरामर्शस्यासंभवात् तथा च भवन्मते एव तादृशविशिष्टपरामर्शविरहस्याथ तादृश
विशिष्टव्यवहाराभावस्यादिति भावः। व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानाभावाद्वह्निव्याप्यवान् अयमिति
ज्ञान ज्ञानाबद्धजन्यानुमितौ स्वमते व्यभिचारमुद्धरति। अत एवेति यत एव तौ इन्द्रियादौ व्यभिचारादिति विशिष्टज्ञानं

वह्निव्याप्यो वह्निव्याप्य इति

नकारणमपितु व्याप्यतावच्छेदकप्रकारकधीवच्छेदेन व्याप्तिग्रहः तत्र प्रकारकपक्षधर्मताज्ञानं कारणमत एवेत्यर्थः।व
ह्निव्याप्यवानयमिति शाब्दज्ञानोत्तरमिति शेषः।व्याप्तिज्ञानमत इति [redacted] व्याप्तिस्मरणावत इत्यर्थः। [redacted] वह्नि
नैयायिकमते· व्याप्यत्वेनैव व्याप्यतावच्छेदकप्रकारत्सादिति भावः।पर्वतीयधूमइति।धूमस्वरूपेण धूमे पर्वत [redacted] ज्ञानमित्यर्थः। त्वे२
वह्निव्याप्यः वह्निव्याप्यो धूमः अयं नवा पर्वतवान्नवा अस्ममतेच वह्निव्याप्यो धूमः पर्वतवानिति विशिष्टानुभवया भा
वान्न तदानीमनुमितिरिति भावः।स्मरणे विद्यमानइति।धर्मितावच्छेदके धर्मे स्मरणे विद्यमानेपीत्यर्थः।धूमस्वरूप प्रकारक ५
नस्य धूमत्वेन रूपेण पर्वतवत्तानिश्चयस्य विशिष्टदर्शनत्वेन व्यावर्तकधर्मदर्शनत्वेन।अन्यथेति।एत व्यावृत्तकधर्म
[redacted]संशयस्तदेत्यर्थः।संशयानंतरमितिशेषः। परामर्शोपि कृतानस्यादिति नववह्निव्याप्यो धूमः पर्वतवा दर्शनसत्वेपि
निति विशिष्टनिश्चयस्याप्यापत्तिः [redacted] नुमितिसामग्र्यास्या एव नचपरामर्शसामग्रीत्वादित्यर्थः।
तस्मान्तत्र संशयो नजायते किंतु विशिष्टनिश्चय एव जायते ततोनुमितिस्त्वया पिस्वीकरणीया [redacted]तिभावः।न
नु ममविशिष्टनिश्चयस्यापत्तिर्नास्ति संशयस्य प्रतिबंधकत्वादित्याशंकते संशयेन विशिष्टनिश्चय
[redacted] नप्रतिबंधादिति।

११

चि॰ टी॰ स्याप्याँपत्तिरितिशेषः। तुल्यमिति। समानाय्यनुमितिं प्रति संशयः प्रतिबंधकस्तु च इत्यर्थः। एतच्चाभ्युपगम्य

वास्तां दृष्टसंशयस्यानुमितिप्रत्यतिरिक्तप्रतिबंधकत्वकल्पने गौरवात्। वस्तुतस्तु। विशेषदर्शनसत्त्वा

न३ त्संशय एवं ज्ञायते इत्यत्रैव निर्भरो बोध्यः। अत एतत्रैव शाकृतं न चेति सामान्यनिश्चयस्येति। धूमत्वरूप

क सामान्यधर्मधर्मितावच्छेदकनिश्चयस्येत्यर्थः। सामान्यसंशयेति। धूमत्वरूपसामान्यधर्मितावच्छे

दककसंशयो[illegible]त्यर्थः। निवर्त्तकत्वात् प्रतिबंधकत्वात् तत्सत्त्व इति शेषः। धूमसामान्यधूमत्वावच्छिन्नावि धूमसामान्ये इत्यत्राहो·

शेषसंशय इति वह्निव्याप्यधूमत्वरूपविशेषधर्मावच्छिन्नविशेष्यताकसंशय इत्यर्थः। विशेषनिश्चयेति

तादृशविशेषधर्मावच्छिन्नविशेष्यताकनिश्चय इत्यर्थः। निवर्त्तनीयः प्रतिबध्यः। धूमविशेषे वह्निव्याप्य

धूमत्वावच्छिन्नसंशयनिरासार्थमिति संशयानंतरमनुमितिनिरासार्थमित्यर्थः। केचित्तु वह्निव्याप्यव्या

प्यमः पर्वतवानिति विशिष्टनिश्चय एवानुमितिहेतुर्वाच्य इत्यन्वयः। पचहीति। तद्धर्मावच्छिन्नतत्प्रकारी

अत तद्धर्मावच्छिन्नेतरत्र संशयात्मकं ज्ञानं सामान्यविशेषेति तद्धर्ममात्रावच्छिन्नतद्धर्मघटितविशेष

तद्धर्मावच्छिन्नेतरत च तद्धर्मघटितविशेष

वे धर्म

धर्मावच्छिन्ने सर्वैः तथा च सामान्याभावत्वव्याप्यत्वबुद्धेः सामान्यघटितविशेषणवत्ता[illegible]बुद्धिप्रति
वह् बंधकत्वे तेन सामान्यधर्मितावच्छेदक[illegible]तद्व्यावर्तकधर्म[illegible]दर्शनमपि सामान्यघटितविशेषधर्मि[illegible] धर्म
तावच्छेदकके तद्वत्ताबुद्धिप्रतिबंधकं भूतलं घटाभाववदिति निश्चये भूतलं घटवदिति बुद्धिवन्नील
प भूतलं घटवदिति बुद्धेरपि स्यात् तद्व्यावर्तकधर्म[illegible]तदत्यंताभावः तदत्यंताभावव्याप्यः तदत्यंता अ
भावो यद्धर्मावच्छेदेन गृहीतः स धर्मः तद्वदन्योन्याभावः तद्वदन्योन्याभावव्याप्यः तद्वदन्योन्याभावो य
अ द्धर्मावच्छेदेन गृहीतः स धर्मः तादात्म्यसंबंधेन तद्वत्ताबुद्धौ तद्दर्शनमपि बाध्यं न च तथापि वह्नि
व्याप्य[illegible]पर्वतवान्न वेति संश[illegible]बाधकं तत्संबंधितावच्छेदके धूपत्वाद्यवच्छेदादिति वाच्यं तादृ
पप२ शसंशयस्य लैंगानुमितेरिष्टत्वात् वह्निव्याप्यधर्मः पर्वतवानिति विशिष्टनिश्चयस्यापि तादृशसंशयस
त्वेप्यनुमितेस्त्वयाप्युपगमादिति भावः। वस्तुतस्तु अन्यथेत्यादिग्रंथोऽन्यथैव योजनीयः तथा हि अ
न्यथा धर्मतावच्छिन्नविशेष्यकः पर्वतवानिति निश्चयाय वह्निव्याप्यत्वावच्छिन्नकधर्मदर्शनमात्रेऽपि न वह्निव्याप्य

12 १२

ध्धूमः पर्वतवानितिनिश्चये

चि॰टी॰

मत्वावच्छिन्नविशेष्यकपर्वतसंशयाभावप्रयोजकस्तदा परामर्शोपीति वह्निव्याप्यो धूमः पर्वतवानिति विशिष्टनि
श्चयापीत्यर्थः। कुतो न स्यादिति वह्निव्याप्यो धूमः पर्वतवान्नवेति संशयाभावाप्रयोजकः कुतो न स्यादित्यर्थः।
अयं विशिष्टनिश्चयस्य तादृशसंशयनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वात् न तादृशसंशया वा।
भावाप्रयोजकत्वमिति चेन्नहि धूमः पर्वतवानिति निश्चयस्यापि तदाश्रयत्वान्न स्यादिनतादृशसंशयाभावाप्रयो
जकत्वमित्याह संशयेन प्रतिबंधादिति संशयनिरूपितप्रतिबंधकतावच्छेदकाश्रयत्वादित्यर्थः। तन्न तादृशसं निष्ठप्रतिबध्यता
शयप्रतिबंधकतावच्छेदकत्वमेवासिद्धमित्यभिप्रायेणाशंकते नन्वेति सामान्यनिश्चयस्येति एवं च तद्धूमसा
मान्यसंशयाभावभूतत्वात्तस्य धूमत्वावच्छिन्नविशेष्यकसंशयस्य न जायते धूमत्वावच्छिन्नविशेष्यकसंश
याभावस्यैव प्रयोजकत्वमिति यावत्। एवं कारात् वह्निव्याप्यधूमत्वावच्छिन्नविशेष्यकसंशयाभावव्यवच्छेदः। विशेष
संशयपक्षत्वात् व्याख्यातार्थकं धूमविशेषसंशयनिरासार्थमिति एव च व्याप्तिनिश्चयो धूमविशेषसंशयनि
रासार्थमवश्यं वाच्य इति योऽसनाप एव च व्याप्तिनिश्चयं वह्निव्याप्यो धूमः पर्वतवानिति निश्चयः। तत्त्वचोपपत्तिदुर्वारा तुमित्या
धूमविशेषसंशयनिरासार्थं वह्निव्याप्यधूमत्वावच्छिन्नविशेष्यकसंशयाभावप्रयोजकं नानुशासनात् यत्र हीत्यादिग्रंथोपि एवं वत नन्तु तथापि
यत्र प्रथमं वह्निव्याप्यो धूमः पर्वतवान्नवेति संशयः ततो धूमः पर्वतवानिति निश्चयः।

काष्ठानि भस्मराशिः क्रियंते ... इत्यादिप्रयोगदर्शनात्

ध्यक

प्रधानकर्मतया विकारकर्मतया वा न प्रथमा उदाहृते गौणकं कर्मत्वाद्य शलमेनन॥

मेवसंशयसंभवइतिवाच्यं। प्रतिबंधकाभावस्यकार्यसहभावेनहेतुतयातदानींसंशयासंभवादितिभावइतिव्याचक्रुः। तदसत् धूमत्वरूपेणपक्षप्र
कारकनिश्चयात्तदृशसंशयासंभवात्। मिश्रास्तुभवत्येवंसंशयः भवतुवानि[illegible]सार्थं तुमि

२ कार्यकालवृत्तित्वेन

संशयस्यैवव्याप्यतावच्छेदकप्रकारकव्याप्तिनिश्चयत्वादित्यस्वरसादिष्टापत्तिमात्रवस्तुतस्त्विति केचित्तु श्रौतिसा
मग्र्याबलवत्त्वात्तदपिनतादृशसंशयसंभवइत्याहुवस्तुतस्त्विति। धूमत्वप्रकारेणेति। धर्मितावच्छेदकप्रकारकधर्मि
ज्ञानस्यैवसंशयहेतुतयातस्यप्रथममावश्यकत्वादितिभावः। पक्षधर्मिताज्ञानेधूमत्वरूपेणपक्षप्रकारकज्ञानेऽनु
मितिर्भवत्येवेति एवकारोऽभिन्नक्रमः अनुमितिरेवभवतिनतुसंशयः अनुमितिसामग्र्याबलवत्त्वादित्यर्थः। नेध्(?) च
मत्वरूपेणपक्षप्रकारकज्ञानदशायांकिंचिद्विशिष्टनिश्चयोऽपेक्षितः तथापिधूमत्वरूपेणव्याप्तिस्मरणेतेनरूपेणप त५
क्षधर्मताज्ञानेचानुमितिर्भवत्येव यत्रनसंशयस्तत्रैवतादृशज्ञानध्यादनुमितिस्तत्रैतु तावतैवसिद्धेः समाहितमिस्सा
रुवस्तुतस्त्वितीत्यादिः। नन्विति। इदमितिपक्षः एरणीयः भावोवाभाववत्त्ववद्वा अभावोवाअभावत्ववद्वाप्रमेयं प्रमेय
त्ववद्व्याप्यवान्। भावत्वाभावत्वयोरितिधर्मयोरितिदृष्टान्तःभावत्वाभावत्वरूपव्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्म
तानिश्चयाभावादित्यर्थः। अनुमानं अनुमितिः। ननु भिन्नभावाभावान्यतरत्वत्वप्रकारेणभावाभावान्यतरत्वनिष्ठ
प्रमेयत्वव्याप्तिज्ञानात्तेनरूपेणतस्यपक्षधर्मताज्ञानाच्चानुमितिः फलबलेनतादृशज्ञानकल्पनादित्यत आह॥

त्व२ त्व
भावाभावान्यतरत्वं अनुमानं२
१ ज्ञानात्

13 २३

त्योदात्ता३ भावा

विं॰टी॰ तदन्यान्यत्वेति भावभिन्नत्वे सत्यभावभिन्नो यस्तदन्यत्वरूपस्य भावाभावान्यत्वस्य स्वाभावो ...अस्वस्येत्यर्थः। लिं
गत्वाभावादिति। अप्रसिद्धेरिति भावः। भावत्वाभावत्वेति। भावत्वाभावत्वान्यतरधर्मत्वरूपेण भावत्वाभावत्वान्यतरध
र्मत्वरूपेण भा[redacted]धर्मे निरूढव्याप्तिपक्षधर्मतानिश्चयादेवानुमितेः फलबलेन ताहशज्ञानकल्पनादित्य
र्थः। एवमिति। लिंगं लिंगतावच्छेदकं यत्रायं धूमवानालोकवान्वा आलोकवान्वा उभयथापि वह्निव्याप्यवानिति ज्ञानानं
तरं अनुमितिस्तत्रापि धूमालोकान्यतरत्वरूपेण धूमालोकान्यतरनिष्ठव्याप्तिपक्षधर्मतानिश्चयादेवानुमितिः
फलबलेन ताहशज्ञानकल्पनादित्यर्थः। पक्षेतरेकज्ञानमिति। यद्धर्मावच्छिन्नविशेष्यकयद्धर्मावच्छिन्नवद्भेद यत्
प्रतिबध्य ज्ञानत्वावच्छिन्नमित्यर्थः। तन्निश्चयसाध्यमिति। तद्धर्मावच्छिन्नविषयतानिरूपिततद्धर्मावच्छिन्नविषयताशालि
निश्चयत्वावच्छिन्नकारणताप्रतियोगिकैका येतावदित्यर्थः। पक्षधर्मस्येति पक्षतावच्छेदकावच्छिन्नपक्षवतस्त्य
र्थः। व्याप्यभेदज्ञानमिति। साध्यव्याप्यवतो भेदज्ञानमित्यर्थः। व्याप्याभेदज्ञानं साध्यव्याप्यत्वावच्छिन्नपक्षतावच्छिन्न वच्छेदका
वतोऽभेदस्य पक्षतावच्छेदकावच्छिन्नरूपा[redacted]स्य ज्ञानं साध्यव्याप्यत्वावच्छिन्नविषयितानिरूपितपक्षतावच्छेद

वघेदका

कावच्छिन्नविषयताशालिनिश्चयत्वावच्छिन्नमिति यावत्। यथाश्रुते तु सिद्धसाधनापत्तेः। एवमग्रेऽपि पक्षधर्मताज्ञा
ने पक्षप्रकारकनिश्चये विशेषणदर्शनात् व्यावर्तकधर्मदर्शनात् पक्षस्यैव वह्न्यादेर्व्यावर्तकत्वादिति भावः। धूमे व्याप्ति पक्षस्व
भेदज्ञानं धूमत्वावच्छिन्ने वह्निव्याप्यत्वावच्छिन्नविशेष्यकपक्षवह्निदर्शनं वह्निव्याप्यधूमत्वावच्छिन्नविशेष्यपक्षवह्नि क
दर्शनमिति यावत्। अत्रेति। व्याप्यभेदज्ञानं साध्यव्याप्यहेतुत्वावच्छिन्ने पक्षवह्निदर्शनं स्वेतरसकलकारणस ह
मवधाने सत्त्वे यत्सत्वे कार्यानुत्पादस्तस्यैव प्रतिबंधकत्वादिति भावः। ननु धूमत्वावच्छिन्नविशेष्यकपक्षप्रकारकनि
श्चयस्य धूमत्वावच्छिन्न [illegible] विशेष्यकपक्षवह्निप्रकारकनिश्चयप्रत्यक्षविरोधितया तत्सत्वेऽपि वह्निव्याप्यधूमत्वावच्छि
कावच्छिन्नवह्ने द न्नविशेष्यकपक्षतावच्छेदकभ्रमे बाधकाभावः इति भ्रमेणाशङ्कते। नन्विति। पक्षधर्मताग्रहे पक्षप्रकारकनिश्चय
विद्यमानेऽपीति शेषः। इयमिति। वह्निव्याप्यो धूमव्यक्तिरियं न पर्वतीयेति योजना। भ्राम्यतः भ्रमे बाधकविरहतः
अनुमित्यापत्तिरनंतरं अनुमित्यापत्तिः। भ्रमं निराकृत्य समाधत्ते। धूमत्वस्येति। घटितत्वं च सत्यर्थः। धूमत्वघटि
तविशेषस्य सत्यर्थः। दर्शनेनेन विशेष्यतावच्छेदकतया भानेन। तादृशभ्रमेऽपि [illegible] सामान्यधर्मावच्छिन्नविशेष्यकत

विशेष

वि॰टी॰ व्यावर्त्तकधर्मवत्तानिश्चयस्य सामान्यघटितधर्मावच्छिन्नविशेष्यताकतन्निश्चयं प्रत्यपि विरोधित्वात् । न च
तथापि वह्निव्याप्यः पर्वतवानित्यस्मिन् इति भ्रमे बाधकाभावः । तत्र धूमत्वस्य विशेष्यतावच्छेदकतया प्रवेशात् इति वाच्यं ता भानाभावात्
दृशभ्रमसत्त्वेऽनुमितेरिष्टत्वात् । वह्निव्याप्यो धूमः पर्वतवानिति निश्चयसत्त्वे वह्निव्याप्यः पर्वतवानिति भ्रमेऽपि
प्प अनुमितेस्त्वयाऽभ्युपगमात् । एवं यत्र प्रथमं वह्निव्याप्यो धूमः पर्वतवानिति भ्रमः ततो धूमः पर्वतवानिति निश्चय
स्तत्राप्यनुमितिरिष्टैवेति भावः । एवं यत्र ति[illegible]स्यादिना सामान्यधर्मावच्छिन्नविशेष्यकतद्व्यावर्त्तकधर्मदर्श
नस्य सामान्यघटितविशेषधर्मावच्छिन्नविशेष्यकतत्संशयं प्रत्यविरोधित्वमुक्तं । ननु तादृशनिश्चयं प्र
ति स्वतो न पौनरुक्त्यं अन्यथा तादृशसामान्यधर्मावच्छिन्नविशेष्यकतद्व्यावर्त्तकधर्मदर्शनस्य सामान्यघटि
तविशेषधर्मावच्छिन्नविशेष्यकसंशयं प्रतिबन्धकत्वे इत्यर्थः । निश्चयसामग्र्यां विशेष्यतावच्छेदकप्रकारकनि
दि श्चयस्यापि विशिष्टपरामर्शसामग्र्यां प्रमाणेनेत्यस्मिन्निति पाठः । धूमोऽयं पर्वतवानिति धूमत्वधर्मितावच्छेदकेन
मानेतरामित्यर्थः । विशिष्टपरामर्श एवेति । वह्निव्याप्यो धूमः पर्वतवानिति विशिष्टपरामर्श एवेत्यर्थः । तथा च

तत्र याद

धूमत्वरूपसामान्यधर्मावच्छिन्नविशेष्यकपर्वतत्ववैशिष्ट्यग्रहानंतरं यथा न तद्घटितविशेषधर्मावच्छिन्नविशेष्यक
पर्वतवत्तानिश्चयस्तथा तादृशसामान्यधर्मावच्छिन्नविशेष्यकपर्वतवत्तानिश्चयानंतरमपि न तद्घटितविशेष
धर्मावच्छिन्नविशेष्यकपर्वतत्ववैशिष्ट्यवत्तानिश्चय इति भावः। अनुपपन्नमवादिनाम्। अस्त्वेवेति। व्याप्यतयेति।
व्याप्यतावच्छेदकरूपेण साध्यव्याप्यतयाऽवगते पक्षवत्तयावगतस्य भेदाग्रहे इत्यर्थः। कल्पनालाघवे हेतुमा
ह। परामर्शहेतुतयेति। नचैवं यद्व्यतिरेके साध्यव्याप्तिबलादेव विशिष्टपरामर्शत्वेन हेतुत्वसिद्धिरिति वाच्यं य
त्वतत्त्वयोरननुगमादुभयवादिसिद्धदृष्टांताभावात्तद्व्याप्तेरसिद्धेः। न च व्यतिरेकेणादृष्टांतत्वमलभ इति वाच्यं। सा
ध्यस्याप्रसिद्ध्या व्यतिरेकदृष्टांते व्याप्यसंभवादिति भावः। असंनिकृष्टधूमज्ञानादपीति। इंद्रियसंनिकर्षवि
रहदशायामपि धूमत्वरूपेणारब्धउच्चैः साध्यव्याप्यत्वपक्षवत्त्वस्मरणादनुमितिरित्यर्थः। गौरवमिति। कारणता
वच्छेदकशरीरगौरवादित्यर्थः। विशिष्टपरामर्शत्वमपेक्ष्य यथाक्रमभेदाग्रहत्वस्य गुरुत्वादिति भावः। तदेति। ध
र्मेंद्रियसंनिकर्षविरहदशायामित्यर्थः। अनुपस्थितेः अनुपपत्तेः। तथा चानायत्या गौरवमप्यासह्यमिति भावः।

एव१

15 ९५

ग्रहःभेद ५८

भेदग्रहं [illegible] व्याप्यतावच्छेदकरूपेणाऽव्याप्यतया गृहीते पक्षवृत्तेर्ज्ञानस्य सा व्याप्यतविशिष्टपक्षभेदनिश्चयस्यतादृशहेतोपक्षप्रकारकनिश्चयस्येति यावत्।

अप्रामाण्यस्य अजनकत्वात् जनकत्वे सं भेयात् तथा चानायत्या कारणीभूतज्ञानाविरोधिनोऽपि तादृशभेदज्ञानस्य प्रतिबंधकत्वं मास्थीयत इति भावः।१

लौहवद्विज्ञानादि [illegible]

नाटशास्य१

चि॰टी॰

उक्तव्याप्तिव्यभिचारस्मारकत्वमपीति। कारणीभूतज्ञानाविरोधिनोऽपि व्याप्तभेदस्य हस्यापि घतियदि व्याप्यतावच्छे दकप्रकारेणाव्याप्यतयाऽवगते पक्षवृत्तिभेदग्रहे वानुमितिहेतुस्तदागोत्वमधुरत्वावांतरजात्यादिलिंगका नुमितिर्न स्यादित्यर्थः। जातिपदं धर्मपरं स च धर्मः परेषामखंडोपाधिरस्माकं च जातिरेवेति फलितोऽनकश्चि द्विशेषः। धर्मांतरेति। अनेनेतिप्रसक्तधर्मांतरेत्यर्थः। न च गोत्वे गोपदप्रवृत्तिनिमित्तत्वमेव तद्वृत्तधर्मः संभव तीवाच्यं। पृथिवीत्वस्यापि गोपदप्रवृत्तिनिमित्ततयातस्यापि प्रसक्तत्वात्। मधुरत्वावांतरजातौ तदसंभवाच्च। अत एव पृथक्तदुक्तौ वेवं। ननु न वेऽभवन्मतेऽपि तस्य गोत्वादावव्यावृत्तिसाधकत्वमित्यत आह। अत एवाहि स्वरूपत एवेत्यर्थः। असमन्वयइति शेषः। विलक्षणत्वात् व्यावर्त्तकत्वात् व्यक्तेरेवेति। गोत्वाद्युपलक्षितगवादिव्यक्ते रेवेत्यर्थः। समवेतत्वसंबंधेन [illegible] रिति शेषः। प्रकार [illegible] त्वात्। अनतिप्रसक्तत्वात्। ननु समवेतत्वस्य संबंधत्वे मा नाभाव इत्यत आह। नहीति। समवेतत्वसंबंधेन गोत्वे गोप्रकारत्वस्येव तत्र विशेषणत्वादिति भावः। ननु गोरि तिज्ञाने गोत्वं प्रकार [illegible] गोत्वमित्यनुभवात् अनुगतयाऽऽहत्यैव विशेष्यइत्यत आह। अप्यपदि व्याप्यत्वग्रहइति। गोत्वघटिते

व्याप्यत्वग्रहे तादृशव्याप्यत्वविशिष्टवत्तापरामर्शे [illegible] चानुपयोग ×वं× प्रसंगादित्यर्थः। विशेषणतावच्छेदकप्रकारकज्ञानविधयैव तत्र एतस्योपयो गादिति भावः। ननु गोनिष्ठाभावप्रतियोगित्वादि गर्भ१

परामर्शेत्यादिः

न च समवेतत्वादिध र्मोऽस्ति।

व वत्रा१

व्याप्यत्वग्रहता हेत्वाव्याप्यत्वविशिष्टपरामर्शे च विशेषणज्ञानविधयैव अग्रेतस्योपयोगादित्यतआह गवितरेति।

[redacted] गोत्वमिसेवपाठः। तथा च गवेतरासमवेतत्वे सति सकलगोसमवेतत्वमेव तत्रानतिप्रसक्तो धर्मस्तस्यानुभ

वसिद्धत्वेनोपप्लुवासंभवादिति भावः। न चैवमिति [redacted] गोत्वेप्यनतिप्रसक्तधर्मस्वीकारे अनव स्थितिस्तत्रापि धर्मा

रस्वीकार ४ न्तरादनवस्थेत्यर्थः। अनुभवेनेति। अनुभवसिद्धत्वेनेत्यर्थः। तथा च प्रामाणिकत्वादनवस्थानदोषायेति भावः॥

धूमादिः परामर्शाएवं पक्षरहस्यं॥ श्री॥ यत्रायंपक्षः व्याप्यत्वसंबंधेन संयोगसंबंधे [redacted] नेव वावह्निव्याप्य [redacted]

तादात्म्यसंबंधेनालोका धूमो वा हेतुः तत्रायंधूमोवा आलोकोवा उभयव्यापिवह्निव्याप्य इति व्याप्यतावच्छेदकधूमत्वादि

प्रकारकसंशयात्मकव्याप्यतावच्छेदकतादात्म्यसंबंधसंसर्गकवह्निव्याप्यप्रकारकज्ञानानंतरमपिव्याप्यतासंबंधेनव

ह्नयादेरनुमितिः परामर्शाभिमता साकथं स्यात। व्याप्यतावच्छेदक [redacted] धूमत्वादिप्रकारकनिश्चयविरहादितिसमाधत्ते।

अयमिति। आलोकोधूमोवेति अत्रतादात्म्यसंबंधेनालोकादिरेवकोटिः। इतिज्ञानमिति इत्याकारकं व्याप्यतावच्छेदकता

(व२) (व्याप्य) तादात्म्यसंबंधेनयत्सोह्निप्रकारकज्ञानविमित्यर्थः [redacted] ततोऽनुमितिः तदनंतरमपिव्याप्यतासंबंधेन

+ न चेदं त्वावह्नित्वेव्याप्यत्वप्रकारकनिश्चयस्यैवायमाकारो न तु व्याप्यप्रकारकनिश्चयस्येति वाच्यं धर्मप्रकारक [redacted]

निश्चयस्यैवतादात्म्यसंबंधेनधर्मःप्रकारः १४

न३

16

आलोकवान्नवो

चि॰टी॰ वह्निरनुमितिः परस्पराभिमतेति विशेषः। तत्र निश्चयः तत्र व्याप्तिपक्षधर्मतानिश्चयः। यद्यपि पर्वतो वह्निमान् धूमाद्
त्यत्र पर्वतो धूमवान्न वा। न यद्यपि वह्निव्याप्यवानिति व्याप्यतावच्छेदकधूमत्वाप्रकारकसंशयात्मकपरामर्शादप्य
नुमितिरनुभवसिद्धा सापि तन्मते न स्यादिति एवं वह्निमुक्तप्रसिद्धाहरणेनाह यद्यपि तैस्तत्र तादृशसंशयात्मकपराम
र्शानन्तरं वह्न्यनुमितिर्जायत इति कोप्यालिखनानुरसियागः। तदन्योन्यत्वमेवेति। धूमालोकान्यतरत्वमेव यद्यपि
तत्र लिंगं तत्र [illegible] व्याप्यंशे विशेष्यतावच्छेदकं सत् पक्षधर्मताग्रहे तु विशेषणतावच्छेदकं तथा च तत्र मध्ये वह्निव्याप्य
धूमालोकान्यतरवान् पर्वत इति ज्ञानं तत्तादनुमितिरिति भावः। तद्दत्वानमपीति। धूमालोकान्यतरज्ञानदशायामपि इत्यर्थः। ला
अनुमितिदर्शनात् तादृशसंशयात्मकपरामर्शानन्तरं व्याप्यत्वादिसंबंधेन वह्नेरनुमितिदर्शनात्। न तथा न मध्येता
दृशानं धूमालोकान्यान्यत्वज्ञानमिति पक्षतादात्म्यसंबंधेन धूमालोकान्यान्यत्वप्रकारक धूमालोकान्यान्यवत्ता
पि॰२ निश्चयं विनेत्यर्थः। व्याप्यत्वानिश्चयेनेति। पक्षप्रत्यासत्ता वह्निव्याप्यत्वप्रकारकवह्निव्याप्यवत्तानिश्चयासंभवेनेत्य
र्थः। संशयादिनिरासार्थं [illegible] विशिष्टदर्शनविधया अवच्छेदकत्वापत्त्या धूमत्वालोकत्वा[illegible]नुपधर्मस्य द्वयस्यावच्छेद
कनिश्चयस्यापयोगादित्यभिमानः। धूमान्यत्वेनैवेति शब्द इवार्थे गौरवादिति। न चैकस्या १

न्या लो

तदन्यान्यत्वस्य व्यभिचारवारकधर्मघटिततया तदन्यान्यत्वेपि एवमुपयुक्तं इति क्रमेणाभ्यं
कृते नन्विति साधु:।४

कत्वएव गौरवमिति वाच्यं। तादृशधर्मस्य कत्वेपि बहुतरभेदादिघटिततया चरमोपस्थितत्वेन च तद्घटकधर्मस्य
यस्यैवावच्छेदकत्वौचित्यात् [illegible] धर्मद्वपसत्वेनैकत्वरूपस्यापि किंचित्करत्वादिति भावः। व्यभिचारेति। अन्यान्यत्ववि
शिष्टलक्षणव्यभिचारवारकधर्मघटितत्वादित्यर्थः। संदिग्धमिव संदेहकोटितावच्छेदकत्वमेवं विरक्तगत्या व्या
प्यस्य पक्षधर्मताज्ञानेकारणमित्याशयेनाह नन्विति। किंचित्तु तदन्यान्यत्वादिति पाठः। तदन्यान्यमिति पाठे तदन्य
दन्यद्घटितइति बहुव्रीहिर्बोध्यः। एवमग्रे वह्निव्याप्यमेव धूमत्वालोकत्वं नन्वेवं धूमालोकान्यतरस्मादिति प्रयोगे
कथं निग्रहइत्यत आह पुरुषेति। नीलधूमत्वादित्यत्रैवेति। तत्रापि नीलधूमत्वस्य व्यर्थविशेषणघटिततया तेन
रूपेण व्याप्तिविरहेपि धूमत्वरूपेण व्याप्तिसत्वादिति भावः। भ्रमेति निराकृत्य समाधत्ते। तदन्यान्यदिति। व्याप्यज्ञानात्
व्याप्यस्य पक्षधर्मताज्ञानात्। अतिप्रसंगादिति। वह्निव्याप्यो धूमः द्रव्यवान्पर्वत इत्यादि वह्निव्याप्यद्रव्यवान्पर्वतः
वह्निव्याप्यद्रव्यवान्पर्वतो वह्निव्याप्यवानित्यादिज्ञानादपि भ्रमवन्मतेऽनुमितिप्रसंगादित्यर्थः। व्याप्यतावच्छेदकप्रकार
कज्ञानादिति। व्याप्तिग्रहविशेष्यतावच्छेदकीभूतो यो व्याप्यतावच्छेदकधर्मस्तत्प्रकारकपक्षधर्मताज्ञानादित्यर्थः। नैवं

तदन्यान्य द्विवह्निव्याप्यमेवाप

द्रव्यं

तत्प्रकारक

चिं॰टी

वामिति॰ एवं धूमालोकान्यान्यत्वस्य व्याप्यतावच्छेदकत्वाभावे धूमत्वालोकत्वादिरूपेण व्याप्तिज्ञानविरहदशायामि
ना तिशेषः॥ तदन्यान्यत्वादिति धर्म्मपरो निर्देशः तादात्म्यसंबंधेन धूमालोकान्यतरेण हेतुतेनेत्यर्थः॥ नन्वित्थं ना ए
नुमातुंशक्यं व्यर्थविशेषणत्वादिति व्यर्थविशेषणतया व्याप्यतावच्छेदकत्वाभावेन तद्धर्मावच्छिन्नस्य व्याप्त्यघटक
त्वादित्यर्थः॥ तद्धर्मावच्छिन्नस्य व्याप्तिघटकत्वे व्याप्यतावच्छेदकत्वस्यावश्यकत्वात्॥ यद्धर्मावच्छिन्नसमानाधिकर
णाभावप्रतियोगितानवच्छेदकं साध्यतावच्छेदकं तस्यैव व्याप्यत्वादिति भावः॥ केचित्तु॥ न चैवमिति एवं व्यर्थवि वच्छेदकलो
शेषणत्वस्य व्याप्यतावच्छेदकत्वविघटकत्वेपि धूमत्वादिना व्याप्तिज्ञानविरहदशायामितिशेषः॥ तदन्यत्वादि ना
ति॥ विशेषणताविशेषसंबंधेन धूमालोकान्यत्वेन हेतुनेत्यर्थः॥ शेषं पूर्ववदित्याहुः॥ तदसत् धूमालोकान्य
न त्वस्य धूमत्वाद्यपेक्षया गुरुत्वे भिन्नधर्मिकतया प्रागभाववद्वैयर्थ्यात् धूमत्वादिरूपत्वेपि च धूमत्वत्वादिप्रवेशेन
वैयर्थ्याविरहादिति दृष्टव्यं॥ न भवत्येव॥ तत्र तेन हेतुतावच्छेदकव्याप्यत्वानुमितिः किंतु प्रत्यक्षमतः तत्र व्याप्तिग्रहोत्तरेति
समाधत्ते॥ प्रत्यक्षं हीति॥ विशेषदर्शनादिति॥ एतच्च संशयोत्तरव्याप्तिग्रहस्य स्वाभिप्रायेण विशेषणविशेष्यसंबंधेन

ण॰१

ति। एतत्संबंधांशे लौकिकप्रत्यक्षाभिप्रायेणाप्यर्थोऽप्रत्यक्षं प्रतिविशेषणविशेष्यसंबंधस्य गुणतया तत्संपादनायेत्यपि कश्चित्।
विशेषणविशेष्यं इंद्रियेति। विशेषणस्य ज्ञानसत्वेपि पुनरिंद्रियसंनिकर्षाभिधानं तदंशे लौकिकप्रत्यक्षाभिप्रायेण। प्रत्यक्ष
सत्वादिति प्रत्यक्षसंभवादित्यर्थः। इदमुपलक्षणं। व्यर्थविशेषणतया तद्धर्मावच्छिन्नघटितव्यापकसामानाधिकरण्यरूप
व्याप्तेर्विरहे पितथैसाध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानेन वा अनुमितेरपि संभवात्। न हि गुरुतया वन्यायमतेपि व्याप्य
तावच्छेदकप्रकारकज्ञानमेव [illegible] कारणमन्यथाव्याप्त्यनुपगमो वेति ध्येयं। न चैवमिति। एवं गुरुतया अव
च्छेदकत्वे। प्रत्यक्षमपीति। गुरुत्तया विधेयितया ज्ञाननिष्ठप्रत्यक्षकारणतावच्छेदकत्वासंभवादिति भावः। गुरुरपीति। तस्य बुद्धेरिति शेषः।
विषय विशेषदर्शनत्वेति। व्यावर्तकधर्मदर्शनतया विपरीतज्ञानविरोधिदर्शनत्वेनेत्यर्थः। प्रत्यक्षसहकारित्वात् प्रत्यक्षोपयोगित्वात्। न
न तु तदन्यान्यत्वज्ञानत्वेन कारणत्वमिति भावः। तदन्यान्यत्वज्ञानमिति पक्षे धूमालोकान्यान्यत्वप्रकारकं धूमालोकत्वा
न्यवत्ताज्ञानमित्यर्थः। तत्रेति अयमालोको धूमो वेत्यादिसंशयात्मकपरामर्शस्थले इत्यर्थः। व्याप्यवत्ताज्ञानोपस्थितामिति।
पक्षे वह्निव्याप्यत्वप्रकारकं वह्निव्याप्यवत्ताप्रत्यक्षोपयुक्तमित्यर्थः। न हीति व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यैव
मेवमतेऽनुमितिहेतुत्वादन्यतरत्वस्य गौरवादिना व्याप्यतानवच्छेदकत्वादिति भावः। इदमुपलक्षणं। संशयादिसामग्र्याः सर्वत्र।

नावश्यकत्वेन यत्रेतरकारणाभावात् संशयाद्यभावस्तत्र धूमालोकान्यान्यवत्ताज्ञानमपि नावश्यकमित्यपि मंतव्यं। अस्तु वा गुरु
रपि धर्मो व्याप्यतावच्छेदकः अस्तु चोक्तस्थले धूमालोकान्यान्यवत्ताज्ञानमावश्यकं तथापि गुरुव्याप्तिप्रकारकयावद्ज्ञान [redacted]
स्थले व्यभिचारान्न व्याप्यतावच्छेदकप्रकारके व्याप्त्यादिज्ञानस्यैव हेतुत्वनियम इत्याह। किं चेति। शाब्दज्ञाने शाब्दज्ञान
जन्यानुमितौ। व्याप्यत्वज्ञानं कारणमिति। पक्षतावच्छेदकावच्छिन्नपक्षविषयताशालिज्ञानं कारणं न तु सर्वत्र व्याप्यवत्प
क्षविषयतानिरूपितव्याप्यत्वावच्छिन्नविषयताशालिज्ञानमेव कारणमित्यर्थः। अन्यत्रापि। वह्निव्याप्यो धूमः धूमवान् पर्वत इत्या
दिज्ञानोत्तरमनुमितावपि तथा तादृशविषयिताशालिज्ञानं कारणं। न तु सर्वत्र व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानमेव का
रणमिति नियमोऽत्रैव व्यभिचारादिति भावः। व्यभिचारमुद्धरति अथेति। तथा च व्याप्यत्वप्रकारकज्ञानस्येव व्याप्यतावच्छेदक
प्रकारकज्ञानत्वान्न नियमस्य व्यभिचार इति भावः। ननु व्याप्तेर्व्याप्यतावच्छेदकत्वे आत्माश्रय इत्यत आह तथापीति प्रत्येकवृत्तिः
प्रत्येकमात्रवृत्तिः सकलधूमादीति सकलधूमालोकादिनिष्ठेत्यर्थः। ननु यत्र वह्निव्याप्यस्तत्र वह्निरिति प्रतीतिरेव मानमित्य
त आह। यत्रेति शाब्दव्याप्यत्वेषु द्वौ चेति चशब्द इवार्थः शाब्दवह्निव्याप्यवानयमिति बुद्धाविवेत्यर्थः। ननु प्रत्येकव्याप्तिज्ञानाभावे
दशायामपि तादृशप्रतीत्युत्पत्तेर्न तस्याः प्रत्येकव्याप्त्या प्रमापकत्वं विषय इत्यत आह प्रत्येकेति तत्रापीति शेषः। प्रत्येकव्याप्तेर्महताव्या
वृत्ति
कवृत्ति

निरूपितव्या
प्यतावच्छिन्न
विषयता

त्ववच्छेदकत्वादिति भावः। इदमापाततः। यत्र यत्र धूमस्तत्र वह्निरित्यस्य धूमत्वावच्छिन्नविषयकत्ववत् यत्र यत्र वह्निरित्यस्या
पि व्याप्यत्वावच्छिन्नव्याप्तिविषयकत्वस्य सर्वानुभवसिद्धत्वात्तत्र धूमादिसमानाधिकरणाभावाप्रतियोगित्वरूपव्याप्य
त्वविषयत्वं कल्पितं। प्रत्येकं तु। वस्तुतो विशेषव्याप्यत्वावच्छिन्नाभाविरिति रिच्यतां तथापि प्रकृतव्यासव्याप्यवच्छेदकत्वे
न व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानसत्त्वेपि वह्निव्याप्यो वह्निव्याप्य इति तत्प्रकारकव्याप्तिज्ञानाभावात् कथमनुमि
तिः स्यात् न च तदनंतरं यो वह्निव्याप्यवान् सोऽग्निमानिति व्याप्तिज्ञानं कल्प्यं ततोऽनुमितिरिति वाच्यं। तथा सति कल्प्यत्वावि
शेषे लघुरूपावच्छिन्नस्यैव नियतपूर्ववर्तितायाः कल्प्यितुमुचितत्वादित्येवं तत्त्वेन तु शब्दपरामर्शमात्रादनुमितिरप्र
सिद्धैवेत्यत आह अपि चेति विशिष्टमिति पाठः। यत्र प्रथमं परदनुमितिरव्यवहितपूर्वं च वह्निव्याप्यधूमत्वविशिष्टमे
वप्रत्यक्षे युगपद्विशिष्टस्यवैशिष्ट्यमितिरीत्या पक्षधर्मे पक्षतावच्छेदकावच्छिन्ने नासते ज्ञायते तत्रेतियोजना। केचित्तु वैशि
ष्ट्यमिति पाठः। अवच्छिन्नस्येत्यादिः। तथा च वह्निव्याप्यधूमत्वावच्छिन्नस्य वैशिष्ट्यमेवेत्यर्थः। शेषं पूर्ववत्। व्याप्यत्वज्ञान
मेवेति। पक्षतावच्छेदकावच्छिन्नपक्षविषयतानिरूपितसाध्यव्याप्यत्वावच्छिन्नविषयताशालिनिश्चयत्वमेवेत्यर्थः। न चैवमिति।
यत्र वह्निव्याप्यो धूमः धूमवान् पर्वत इति ज्ञानानंतरमनुमितिस्तत्रेति शेषः। कारणत्वे पूर्ववर्तित्वं कल्पनं। सप्रमाण।

वैशिष्ट्यमि
त्यर्थः

आसिद्धानं

चिं॰टी॰

कत्वादिति। कार्यकारणभावग्रहाधीनप्रमाणागम्यत्वादित्यर्थः। अयं हेतुः विशिष्टपरामर्शस्थाने अव्यवहित एव वृत्तितासंबंधेनो
नुमितिमत्त्वादित्यनुमानेन विशिष्टपरामर्शसिद्धावनुकूलतर्कविधया कारणताग्रहस्य बीजत्वादिति भावः। तावतैव कथं नदो
षत्वं तदाह कारणताग्रहदशायामिति। त[illegible]दशायामित्यर्थः। फलेति फलं विशिष्टपरामर्शानुमित्योः कार्यकारण
भावग्रहः स एव मुख्यं निश्चयबीजं यस्य एतादृशं यत्तर्कोपगमतिरिक्तविशिष्टपरामर्शरूपं तस्येत्यर्थः। सिद्ध्यसिद्धिभ्यामिति। कल्पना
ज्ञानाज्ञानाभ्यामित्यर्थः। तदानीं तस्य ज्ञानसत्त्वे कार्यकारणभावग्रहस्य तन्निश्चयप्रयोजकतया संशयरूपमेव तज्ज्ञानं भवि
ष्यति तत्र न दोषताप्रयोजकं निश्चितगौरवस्यैव दोषत्वात् अज्ञानं चेत्तर्हि न दोषाय स्वरूपसत्त्वगौरवस्यादोषत्वादिति भावः। के
चित्तु सप्रमाणकत्वादिति। अनुमित्यात्मककार्यरूपप्रमाणागम्यत्वादित्यर्थः। उक्तानुमानेनैव तत्सिद्धेरिति भावः। ननु कार्यस्य न
प्रमाणत्वं कार्यकारणभावग्रहे सति स्यादनुकूलतर्कविधया तस्य तत्रोपयोगात्। स एव न संभवति गौरवेण प्रतिबंधादित्यत
आह। कारणतेति अपेक्षा एवं वदंतीति वदंति। सप्रमाणकत्वादितिव्याख्यातं तु न संगच्छते। सप्रमाणकत्वस्यादोषताप्रयोज
कत्वात्[illegible]गौरवमात्रस्यैवादोषत्वापत्तेः निष्प्रमाणकं गौरवमस्तीति ध्येयं। इंद्रियासंनिकृष्टादिस्थले प्रागुक्तव्यभिचारमुद्ध आ
रति। न चेति धर्मत्वज्ञानेनेति। धर्मस्य प्रकारकपक्षधर्मताज्ञानेनेत्यर्थः प्रत्यक्षानुमानेति आकाशं निरवयवद्रव्यं परममहत्त्वादि

मणिकृन्मते न च पूर्वव्याख्या या कार्यभूतानुचा रि[illegible]त्वंमतम पपाद्यते

आकाशं नित्यद्रव्यममूर्तत्वादित्यात्मकानुमानाभ्यामाकाशवृत्तितयोपनीतेत्यर्थः। आकाशवृत्तितया स्मरणादिति। एतेन सहचारज्ञा
नं संपादितं। मनसा व्याप्त्यनुभवेति। न च तत्र स्मरणरूपमेव व्याप्तिज्ञानं स्यादिति वाच्यं। व्याप्तिस्मरणेप्यनुमित्युत्पत्तेरिति भावः।
ननु तत्र साध्यसाधनग्राहकप्रत्यक्षेकानुमानाभ्यामिव व्याप्तिग्रहः स्यात् किं मानसेनेत्यत आह। अनुमानयोरिति। व्याप्त्यग्रा
हकत्वादिति। व्याप्तिविषयकत्वादित्यर्थः। न हि सहचाराविषयकं ज्ञानं नियतसहचारात्मकव्याप्तिविषयकं संभवतीति भावः। न
त्रापीति। न च तत्राप्यनुमानान्तराद्व्याप्तिग्रह इति वाच्यं। तादृशाविरलव्याप्त्यनुमितिधाराविरहेप्यनुमितेरानुभविकत्वादिति भावः।
तदुपनयसहितस्य तत्तदुपनयरूपासाधारणकारणसहितस्य वह्न्यादिरर्थप्रमाजनकत्वे पर्वतादिवह्निविषयकलिंगप्रत्यक्षा
दिजनकत्वेऽपनयस्यं तत्तदुपनयस्य प्रमाणान्तरत्वं प्रमाणान्तरत्वप्रसंगः। पर्वतादिविशेष्यकलिंगप्रकारकप्रमाणत्व
प्रसंगादितियावत्। यदसाधारणमित्याद्युक्तव्याप्तेरिति भावः। नियतव्यापाराभावेन कारणत्वव्यापकस्य तज्जनकत्वव्या
पारत्वस्याभावेन प्रमाप्रामकरणत्वात् पर्वतादिविशेष्यकवह्निव्याप्यादिप्रकारकप्रमायाः करणत्वापादनासंभवात्। यत्तु व्या
पारसंभवस्तस्य कारणत्वं निश्चलमेव। यद्यप्यपक्षोबाधोऽनुगुण एव तथापि तदर्थविषयकज्ञाने हेतुव्यापारत्वे सति तदर्थविष
यकज्ञानासाधारणकारणत्वमेव तदर्थविषयकप्रमाकरणत्वं व्याप्तं। ननु यदसाधारणमित्युक्तो हेतुर्मानाभावादिति भावः। ननु
ननु व्यापाराभावेऽसहकारितैव कुतः इत्यत आह। सहकारिता चेति। यदसाधारणेत्यादिव्याप्तौ व्यभिचारमप्याह। वह्नीन्द्रियेति।

२०

20

व्यापकवह्नि...
ति।निषंतत्सामानाधिक
रण्यस्य

चिं०टी० तथाचात्रैवसाधनाव्यापकत्वनिश्चय इति भावइतिवाचस्पतिः।प्रात्यक्षिकपरामर्शप्रतिबंदिमुखेनानुमितित्वजातिंखंडयति स्या
देतदिति पक्षधर्मस्य पक्षसंबंधस्य।व्याप्यताज्ञानं वह्निव्याप्यत्वप्रकारेणपक्षीयधूमेज्ञानं वह्निव्याप्योधूमः पर्वतेइति
ज्ञानमितियावत्।नेंद्रियेति।वह्नौलौकिकसंनिकर्षविरहदशायांकदाचिदपिनेंद्रियेणतन्नियतसामानाधिकरण्यस्यैत्यर्थः।
अयोग्यत्वादिति इंद्रियेणगृहीतुमशक्यत्वादित्यर्थः।यावद्विषयसंनिकर्षस्यप्रत्यक्षहेतुत्वादितिगूढोभिसंधिः।धू
मत्वेनेति।महानसीयधूमेवह्निव्याप्तिप्रत्यक्षदशायांधूमत्वसामान्यलक्षणप्रत्यासत्त्याधूमत्वरूपेणसर्वस्यैवधूमस्यव्या
प्तिसामान्यलक्षणाधीनवह्निव्याप्यत्वप्रकारकानुभवादित्यर्थः।धूमविशेषइति।संस्कारात् स्मरणाद्वाधूमविशेषउपनीत
व्याप्यभेदइतियोजना।संस्कारात् धूमत्वावच्छिन्नसकलधूमविशेष्यकनिखिलवह्निव्याप्तिप्रकारकसंस्कारात् एतन्मतेसवि
षयकमात्रंप्रत्यासत्तिः विशिष्टाधिकरणकवैशिष्ट्यबुद्धावपिस्वविशेष्यतावच्छेदकधर्मप्रकारकविशेष्यविषयकमात्रंकार
णमितिप्राचीननये तत्स्मरणाद्वाधूमत्वावच्छिन्नसकलधूमविशेष्यकनिखिलवह्निव्याप्तिप्रकारकस्मरणाद्वा एतन्मतेज्ञान
मेवप्रत्यासत्तिः।विशिष्टाधिकरणकवैशिष्ट्यबुद्धावपिविशेष्यतावच्छेदकप्रकारकविशेष्यज्ञानमेवहेतुरितिनव्यमते।धूम
विशेषेपक्षीयधूमेउपनीतव्याप्यभेदग्रहः स्वविषयीभूतवह्निव्याप्याभेदप्रकारेणालौकिकमनसस्संबंधसाक्षात्कारः स्व
संस्कारादिः वह्निव्याप्याभेदोवह्निव्याप्यत्वंप्रत्यभिज्ञानेप्रत्यभिज्ञानविशेषणीभूतं तदिदमंशेप्रत्यभिज्ञायतेऽस्मिन्नितिव्युत्पत्तेः।

चक्षुःसंयो

सामा

णं

तत्तद्विशेषस्यैव संस्कारात् स्मरणाद्वा तत्तद्विशेषस्य संबंधसाक्षात्कारः। धूमवत्त्वेनेति। वह्निव्याप्यधूमवत्त्वप्रकारकेत्य
र्थः। वह्निव्याप्तिज्ञानात् व्याप्तिघटकतया वह्नित्वरूपेणाखिलवह्निमद्ज्ञानात् परामर्शरूपात् संशयोत्तरप्रत्य
क्षं प्रति विशेषदर्शनस्य हेतुतयाऽनुमितिस्थले च संशयस्यावश्यकत्वात्तत्संपादनाय प्रकारांतरं ज्ञानविशेषणं। धू
मवाद्विशेषइति। वह्निव्याप्यवत्त्वांशे विशेष्यीभूत इत्यर्थः। समानधर्मिकविशेषदर्शनस्यैव संशयोत्तरप्रत्यक्षहे
तुत्वमिति तत्संपत्त्यर्थमिदमभिहितं। संस्कारवशात् अलौकिकसंनिकर्षवशात् बहिरिंद्रियेण प्रत्यक्षे मुख्य
विशेषणासमं लौकिकसंनिकर्षस्यापेक्षितत्वात् तत्संपत्त्यर्थमिदमभिहितं। प्रत्यक्षेणाइंद्रियेण व्याप्तिज्ञाना
पेक्षणेति। व्याप्तिज्ञानजनकेनेत्यर्थः। एतच्च पर्वतेन समं परामर्शजनकेंद्रियसंनिकर्षस्थलाभिप्रायेण।
तेन क्वचिदिंद्रियांतरात् प्रत्यक्षसंभवेपि न क्षतिः। वह्निमद्धूदग्रह इति। अभेदसंबंधेन वह्निमत्प्रकारकग्रह इत्यर्थः।
संयोगादिसंबंधेन वह्निप्रकारकग्रहस्यानुभवसिद्धत्वादाह वह्निमत्त्वग्रहेवेति। संयोगादिसंबंधेन वह्निप्रका
रकग्रहाभावेत्यर्थः। किमनुमानेन। किं वह्निव्याप्यधूमवान्पर्वत इति परामर्शानंतरं प्रत्यक्षस्य विजातीयप्रमाकल्पने
नेत्यर्थः। ~~किमनुमानेन। कि~~ पद्यचकू वह्निमत्त्वस्मरणामिति। स्वतंत्रतया वह्निज्ञानमित्यर्थः। तत्र नास्तीति। अनु

महानसादिः। तत्पर्वतादिः

चिं०२१ तितिपूर्वसमयेसर्वत्रनास्तीत्यर्थः। यत्रोद्बोधकादिवशात् दृष्टांतस्थसाध्याधिकरणमेवसाध्यसामाना
धिकरणघटकतया भातं तत्रैवावच्छिन्नभावव्दवृत्तित्वरूपव्याप्तिरेव परामर्शस्तत्र तदभावादिति भावः। व्या
प्यवच्छेदकतयेति। व्याप्तिघटकतयेत्यर्थः। तथा च स्वातंत्र्येण विशेषणज्ञानस्य विशिष्टप्रत्यक्षहेतुत्वेन
तदभावात् कथं पक्षे साध्यविशिष्टबुद्धिः प्रत्यक्षे त्यागीति भावः। स्वातंत्र्यं च यद्यपि नाविशेषणत्वं धारावाहिक घटः३ धारावाहिक
प्रत्यक्षस्थले स्याव्छेदापत्तेः। नाविशेषणविशेषणत्वं घटत्ववद्भूतलमिति ज्ञानोत्तरं घटवद्भूतलमिति घट
त्वविशिष्टप्रत्यक्षानुपपत्तेः। घटत्वस्य विशेषणविशेषणत्वेनैव ज्ञानात् तथापि फलीभूतविशिष्टप्रत्य
क्षविशेष्येतरमात्रविशेषणत्वं स्वातंत्र्यपदार्थः। चैत्रमैत्रोभयविशेष्यकदंडादिप्रकारकज्ञानानंतरं दोष
वशाज्जायमाने केवलचैत्रविशेष्यकदंडादिप्रकारकप्रत्यक्षे व्यभिचारवारणाय मात्रपदं तथा च फलीभूतप्रत्य
विशेषणव्याप्त्या क्षविशेष्यसम्बन्धनिरूपितविषयतातिरिक्तविशेषणविषयिताशालिज्ञानं हेतुरिति फलितं। ननु तस्य स्मरणस्य
न संशयेन विनाशात् तावत्कालमवस्थानं। न च कोटिस्मरणस्य नाशोपि संशय एव स्वातंत्र्येण विशेषणोपस्थिति
रूपावर्त्तत इति वाच्यं यत्रादौ संशयस्ततो व्याप्तिस्मरणं ततः परामर्शः तत्र संशयस्यापि नाशादित्यस्वरसात्

निष्ठ

दाह नचेति नवेत्यर्थः। विशिष्टज्ञाने विशिष्टप्रत्यक्षस्य अन्यथात्वं तत्र विशेषणताज्ञानस्य विशिष्टधीसामान्ये हेतुत्वा
भ्युपगमे ऽनुमितेरप्यसंभवादनुमितेरपि विशिष्टज्ञानत्वादिति ध्येयं। येयुत्रेति। परामर्शेपि वह्निमत्त्वसामान्यलक्षण
या पर्वते वह्निमानादुक्तं। विशिष्येति। [illegible] किंत तत्र [illegible] क्तित्वरूपेणेत्यर्थः। क्वचिद्विशेष्येति न पाठः तत्रापि योयत्रेत्य
नंतरं तत्र प्रकरणीयं संस्कारवशात् संस्काराद्युपनयवशात्। नेच पर्वत इति। सर्वत्रेति शेषः। विशिष्य तत्तद्व्यक्तित्वे
रूपेण। एवमग्रेपि। नन्वेवमेकस्मिन्नर्चंदने सौरभज्ञानेर्चंदनांतरे च सुरभौ सौरभज्ञानं न स्यादित्यत्र घ्राणजत्वमाह। यत्रेति।
पक्षधर्मधर्मेपीति तथाच तत्रेवोक्तनियमस्य व्यभिचार इति भावः। ननु संस्काराद्युपनयवशान्न व्याप्तिबोधः किं
तु व्याप्तिलौकिकसाक्षात्कार एव व्याप्तेः सामानाधिकरण्यात्मकत्वेसंयोगादिरूपत्वादित्यभिमानेन। व्यभिचारमु न
द्धरति। नचेति। महानसीयधूमवदिति सप्तम्यंता द्वृत्तिः पर्वतीयधूमे व्याप्यवगमः पर्वतीयधूमेपि व्याप्तिलौकि
साक्षात्का कसंनिकर्षाभावादिति। लौकिके संनिकर्षविरहादित्यर्थः। नचोपनयएव संनिकर्षोस्तीति वाच्यं। योजेमत्रेत्यादिनियमादुनयसंनिकर्षवशेन प्रत्यक्षासंभवादिति भावः। हेतुसाध्येति। पक्षीय हेतुपक्षीयलौकिकसाक्षात्कार विनेत्यर्थः।
व्याप्यग्रहात् पक्षीयहेतौ पक्षीयसाध्यस्य व्याप्तिलौकिकप्रत्यक्षासंभवात् स बाधिदूयं निरूपपपदार्थलौकिकप्रत्यक्ष
स्य
साध्य

वि॰टी॰ प्रतिसमानेन्द्रियजन्यसंबंधिद्वयलौकिकसाक्षात्कारस्य हेतुत्वादिति भावः। ननु पर्वतीयधूमस्य लौकिकसाक्षात्का
रेऽस्त्येवेत्यत आह नचेति। पर्वते वह्निसाक्षात्कारः पर्वतीयवह्निलौकिकसाक्षात्कारः तथा च पक्षीयसा
ध्यस्य लौकिकसाक्षात्कारो नास्तीति भावः। ननु तादृशप्रत्यक्षसामान्ये प्रत्येकं संबंधिद्वयसाक्षात्कारस्य हेतुत्वे संबंधिद्वयेत्या
मानाभाव इत्यस्वरसादाह। नचेति न वेत्यर्थः। पक्षसाध्यग्रहं विना पक्षीयसाध्यज्ञाने लक्षणासंनिकर्षं विना लौकि दिनालौकिक
कप्रत्यक्षेणागृहीतुमशक्येति शेषः। पक्षीयहेतौ निष्प्रव्याप्तेः पक्षीयसाध्यघटितमूर्तिकत्वेन तत्प्रत्यक्षस्य पक्षीय प्रत्यक्षेत्यर्थः
साध्यप्रत्यक्षरूपतानियमात्। पक्षीयसाध्यप्रत्यक्षसामग्रीं विनाऽसंभवात्। लौकिकसंनिकर्षस्य च पक्षीयसाध्येन
समम् भावात्। तथा च तत्रोक्तनियमस्य व्यभिचारोद्धार एवेति भावः। यो यत्र विशिष्यस्तु नियमस्य व्यभिचारं वार
यितु पक्षीयसाध्यप्रत्यक्षसामग्रीं विनापि व्याप्तिलौकिकप्रत्यक्षमुपपादयति। उच्यत इति। तस्माति विशेषणस्य विशेष्य
णासंबद्ध इत्यर्थः। एतच्च विशेषणविशेष्यसंबंधांशे लौकिकप्रत्यक्षाभिप्रायेण तत्र विषयविधया तस्य हेतुत्वात् विशेष
दर्शनमिति एतच्च विपरीतज्ञानोत्तरप्रत्यक्षहेतुपयुक्तमिति। विशेषणतेति। विशेषणविशेष्याभ्यामिन्द्रियलौकिकसंनिक

धेऽत्यर्थः। विशिष्टप्रत्यक्षे करणं विशिष्टलौकिकप्रत्यक्षे करणं। ननु पर्वतीयधूमनिष्ठव्याप्तेः पूर्वमननुभूतत्वेन महान
सीयधूमव्याप्तेरेव स्मृतत्वान्न तस्याः पर्वतीयधूमे सत्त्वं सामानाधिकरण्यात्मकतया प्रतिव्यक्तिभिन्नत्वादित्यस्वरसादाह ए त
केव हीति। व्याप्तेर्धर्मत्वादिरूपत्वादित्यर्थः। यद्यपि व्याप्तिः प्रतिव्यक्ति विभिन्नसाध्यसामानाधिकरण्यरूपत्वेऽपि न स्मृतिः सामा
न्यतो वह्निधूमसमानाधिकरण्य त्वेन महानसीयसाध्यसकलसामानाधिकरण्यानां तु पक्षस्मरणसंभवात् तथापि व्याप्तेर्वह्निसा
मानाधिकरण्यरूपत्वे न पर्वतीयधूमनिष्ठपर्वतीयवह्निसामानाधिकरण्यस्य पर्वतीयवह्नितदधिकरणघटिततया पर्वती
यवह्निप्रत्यक्षसामग्रीं विना न पर्वतीयधूमे वह्निव्याप्तिलौकिकप्रत्यक्षसंभवः। वह्निसमानाधिकरणवृत्तिधूमत्वरूपत्वे पर्वती
यवह्निप्रत्यक्षादिसामग्रीं विनापि महानसीयादियावद्विशिष्टवह्निप्रत्यक्षसामग्रीसत्त्वे पर्वतीयधूमे महानसीयादिवह्निसामा
नाधिकरण्यमात्रविषयकवह्निव्याप्तिलौकिकप्रत्यक्षसंभवात्। पर्वतीयधूमे महानसीयवह्न्यादिसामानाधिकरण्यबाधितत्वे
पि तत्समानाधिकरणवृत्तिधूमत्वस्य तत्राबाधितत्वादित्यभिप्रायेणोक्तं। व्याप्तिविशिष्टधूमेन्द्रियसंनिकर्षश्चेति। व्याप्तिपर्व
तीयधूमयोर्लौकिकसंनिकर्षश्चेत्यर्थः। व्याप्तेर्धर्मत्वादिरूपतया संयुक्तसमवायादेरेव लौकिकसन्निकर्षस्य सत्त्वादिति भावः।
व्याप्तिविशिष्टज्ञानं कारणं पर्वतीयधूमे वह्निव्याप्तिविशिष्टस्य लौकिकप्रत्यक्षे कारणं अतः पर्वतीयवह्निप्रत्यक्षसामग्रीं वि

न चैवमनुमितावपि कथं पर्वतीयवह्निमानं विशेषणज्ञानविरहादिति
वाच्यं

नापि पर्वतीयधूमे वह्निव्याप्तिलौकिकप्रत्यक्षसंभवति न च व्याप्तिर्वह्निघटितवृत्तिकतया वह्निप्रत्यक्षसामग्रीं विना कथं
तल्लौकिकप्रत्यक्षमिति वाच्यं। यो यत्र व्याप्युक्तनियमात् पर्वतीयवह्निमत्त्वविषयकोपनीतभानसामग्र्यसत्त्वेपि महानसीया
दिवह्नित्वविषयकोपनीतप्रत्यक्षसामग्रीसत्त्वान्महानसादौ विशिष्टव्याप्तिहेतुरेव पुरावह्निरवगमात् परामर्शसामानाधि
करण्यप्रतियोगितया सकलवह्निमानेमानाभावात्। न चैवमनुमितावपि कथं पर्वतीयवह्निमानं विशेषणज्ञानविरहादिति
वाच्यं स्वरूपतो विशेषणविषयकविशिष्टप्रत्यक्षं प्रति विशेषणज्ञानस्य हेतुत्वेप्यत्र तद्धेतुत्वे मानाभावः। न च वह्निविशिष्टज्ञा
नसामग्रीति। न च सर्वत्र पर्वतवह्निविशिष्टलौकिकप्रत्यक्षसामग्र्यापत्तिः। व्यहरसंनिकर्षादिति। सर्वत्र वह्निनासमं लौकिक
संनिकर्षविरहादित्यर्थः। अथ लौकिकप्रत्यक्षसामग्रीविरहे पुनः संनिकर्षादुपनीतभानमेव पर्वते वह्निभं विषयति यत्र पू
र्वं न पर्वतीयवह्निर्भानं तत्रापि वह्नित्वरूपेण परामर्शविषयवह्नेरवभानसंभवात् तावतापि पर्वतो वह्निमानिति ज्ञाननिर्वा
न च हात्। परामर्शानंतरं जायमानस्य तादृशज्ञानस्य सर्वत्र पर्वतीयवह्निविषयकत्वमनुभवसिद्धं न चैवं न मत्वापत्तिरिति
त्वा वाच्यं। तद्व्यक्तौ वह्नित्वाभाववत्तिन तद्व्यक्तिप्रकारकत्वरूपतद्व्यक्तिभ्रमस्यापि [illegible]त्वादिति चेन्न। यो यत्र व्याप्युक्तनियमादुपनीत [illegible]
भानस्यापि सर्वत्रासंभवादिति निगर्वः। धूमव्यापकवह्निसमानाधिकरणवृत्तिधर्मत्वमेव व्याप्तिस्तद्विशिष्टस्य धूमस्य पर्व

अधिकं चास्मत्कृतसिद्धांतरहस्ये नुसंधेयं॥

तथाप्यंशे लौकिकप्रत्यक्षात्मक एव परामर्शो वह्नौ लौकिकसंनिकर्षविरहदशायामपि अनुमितिहेतुरिति। योयत्रेतिनियमस्या
पि न भंग इति स्वयमुक्तं केचित्तु धूमव्यापकवह्निसामानाधिकरण्यमेव व्याप्तिः स्वाश्रयवृत्तित्वसंबंधेन तद्विशिष्टस्य धू सामाना नाधिकर ण्य..
धूमत्वं मत्वस्य स्वाश्रयसंयोगादिरूपपरंपरासंबंधेन पर्वते परामर्शादेव सर्वत्रानुमितिरतो योयत्रेत्यादिनियमभंगं विनैव
वह्नौ लौकिकसंनिकर्षविरहदशायामपि व्याप्त्यंशे उपनीतभानात्मकप्रत्यक्षरूप एव परामर्शोऽनुमितिहेतुरित्याहुः तन्मतमु
पन्यस्यति [illegible]श्चिति। वह्निव्याप्यत्वं धूमव्यापकवह्निसामानाधिकरण्यरूपं वह्निव्याप्यत्वं मत्त्वे वृत्तिधूमत्व इति स्वाश्र
यसंयोगरूपपरंपरासंबंधेन पक्षांशे प्रकारकीभूतधूमत्वमित्यर्थः। एवंमित्यनुभवादिति विशिष्टपूर्वमनुभवादित्य
र्थः। अतो न यत्रेत्यादिनियमभंग इति भावः। नन्वेवमपि अनुकारणपरामर्शानिर्वाह इत्यत आह एवं चेति। धूमत्ववान् इति
व्याप्येति। वह्निव्याप्यधूमत्ववान् पर्वत इति परामर्शादित्यर्थः लिंगं स्यादिति विषयः स्यादित्यर्थः। यादृशव्याप्तिज्ञानमनु ले
२ मितिहेतुस्तादृशज्ञानस्यैव लिंगमवक्तृहेतुत्वादिति भावः। तन्निष्पत्तिमाशंक्याह तथा चेति सर्वोपसंहारेणेति सर्वा
[illegible]धूमव्यक्तिं विशेष्यीकृत्येत्यर्थः। यत्कौ संनिकृष्टधूमव्यक्तौ। तादृशव्याप्तिग्रहस्य अनुमितौ लिंगादिव्यवहारस्य चानु
मितिलिंगादिव्यवहारं प्रति साक्षात्संबंधेन भवदुक्तव्याप्तिज्ञानमेव हेतुरे[illegible]तौ च लाघवात् परंपरासंबंधेन धूमत्वे
नुमितौ

24

चिं.टी.

रमानाभावादिति

अपेक्षमयत्र अन्वयः अन्यथा व्याप्तिविशिष्टज्ञानं

व्याप्यत्व परामर्शत्वेन हेतुरत आह दृश्यते चेति परंपरेति परंपरासंबंधेन पक्षधर्मताज्ञानं विनापि जातिव्याप्तिमविदुषो
पीत्यन्वयः लिंगस्य व्यवहारे संबंधज्ञानस्यानुपयोगितया व्याप्यत्वाकृतासंगतेः। व्याप्यताग्रहः परंपरासंबंधेन व्याप्यता
ग्रहः स्वमते तृतीयलिंगपरामर्शस्वरूपं निर्दिशति तस्मादिति। पक्षधर्मे पक्षधर्मस्य पक्षसंबंधस्येति यावत् व्याप्ति
विशिष्टज्ञानं तृतीयलिंगपरामर्श इति संबध्यते तथा च वह्निव्याप्यो धूमः पर्वतस्त्याकारकं व्याप्तिविशिष्टकं प्रकारकज्ञा पक्ष४
नं तृतीयलिंगपरामर्श इति भावः। तदनंतरमिति तदनंतरं पक्षविशिष्टवैशिष्ट्यज्ञानं वा तृतीयलिंगपरामर्श इति योजना।
तदनंतरं हेतौ व्याप्तिप्रकारकज्ञानानंतरं विशिष्टवैशिष्ट्यज्ञानं व्याप्तिविशिष्टनिरूपितवैशिष्ट्यज्ञानं। तथा च वह्निव्या
प्यधूमस्त्यादिज्ञानोत्तरोत्पन्नं वह्निव्याप्यधूमवान् पर्वतस्त्याकारकं पक्षविशेष्यकव्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञा
नं वा तृतीयलिंगपरामर्श इति भावः। वाशब्दश्चार्थे विनिगमनाविरहेण व्याप्यविशेष्यकपक्षविशेष्यकयोरुभयोरपि परामर्
शयोरनुमितिहेतुत्वादिति संप्रदायः। न चानयोः परामर्शयोस्तृतीयत्वं कथमिति वाच्यं। आदौ वह्निव्याप्तिरिति विशेषणीभू
तव्याप्तिस्मरणं ततो वह्निव्याप्यो धूम इति धूमे वह्निव्याप्तिविशिष्टज्ञानं विशेषणज्ञानस्य विशिष्टज्ञाने हेतुत्वात् ततस्तृती
यस्तयोर्नयोरुत्पत्तिः विशिष्टाधिकरणकवैशिष्ट्यबुद्धौ विशेष्यतावच्छेदकप्रकारकज्ञानस्य विशिष्टनिरूपितवैशिष्ट्यबु

द्वेषचविशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वादितिरीत्यात तीयत्वात तत्रुन सार्वत्रिकं कचित्तु प्रथमद्वितीयस्य
ण्योरपिताद्दशपरामर्शोत्पत्तिसंभवात् । प्राचस्तु पक्षधर्मेपक्षवृत्तित्वविशिष्टे व्याप्तिविशिष्टज्ञानं व्याप्तिप्रकारकज्ञा
नं तथाच पर्वतवृत्तिधर्मो वह्निव्याप्य इत्याकारकं पक्षवृत्तित्वविशिष्टे व्याप्तिप्रकारकज्ञानं तृतीयलिंगपरामर्शइति
भावः । शेषंपूर्ववत् नचतृतीयत्वंकुतइतिवाच्यं । आदौ पर्वतवृत्तित्वरूपपक्षधर्मइतिज्ञानं ततोव्याप्तिस्मरणं ततः पर्व
तवृत्तित्वविशिष्टधर्मेव्याप्तिविशिष्टज्ञानमितिक्रमेण तृतीयत्वसंभवादित्याहुः । तदसत् वह्निव्याप्यो धूमः पर्वतवृ
त्याकारकस्यव्याप्तिविशिष्टविशेष्यकपक्षप्रकारकज्ञानस्यैव वह्निव्याप्यधूमवान् पर्वत इत्यादिपक्षविशेष्यकपरामर्शेनस
मेविनिगमनाविरहेणानुमितिहेतुत्वाभ्युपगमात् पर्वतवृत्तिधूमो वह्निव्याप्य इतिज्ञानस्य चयथोक्तपक्षविशेष्यकज्ञानापे
क्षयागुरुत्वात् पक्षतावच्छेदकावच्छिन्नपक्षविषयतानिरूपितव्याप्यत्वावच्छिन्नविषयताप्रतियोगिनिश्चयत्वेनपक्षविशे
ष्यकपरामर्शसाधारणधर्मेणहेतुतामते तस्यकारणतावच्छेदकानाक्रान्तत्वाच्चेतिध्येयं । व्यापकतापरामर्शहेतुतावादि
नोमतमाह अन्येत्विति अप्रतियोगित्वं प्रतियोगितानवच्छेदकसाध्यतावच्छेदकवत्वं । व्यापकताज्ञानमिति साध्यताव
च्छेदकेहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वज्ञानमित्यर्थः । अनुमितिहेतुः अनुमितौकारणं । साध्यस्येति ।

चिं०टी० साध्यविशेष्यकं हेतुतावच्छेदकविशिष्टो पक्षलक्षणाविधया पक्षवृत्तित्वप्रकारकमुपलक्षणाविधया हेतुतावच्छेदकसं
बंधेन पक्षप्रकारकं वा हेतुतावच्छेदकविशिष्टवन्निष्ठाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकवत्त्वज्ञानमित्यर्थः।
परामर्शः। अनुमितिजनकपरामर्शः तथा च पर्वतवृत्तिधूमव्यापको वह्निरित्याकारकं पर्वतवृत्तिधूमव्यापको वह्नि
रित्याकारकं वा साध्यविशेष्यकं ज्ञानं तदनुमितिजनकपरामर्श इति भावः। अत्र पर्वतत्वादिकमुपलक्षणं तथा धूमादौ
प्रकारः न तु व्यापकतायां तथा भावः तेन विशिष्य पर्वतीयधूमव्यापकत्वस्य भानानुपगमे तलेप्यनुमितेर्नानुपपन्ना नवा
अत एवेत्यग्रिमग्रंथविरोध इति ध्येयं। साध्यव्याप्तस्येति सप्तम्यर्थे षष्ठी पक्षधर्मताज्ञानं पक्षवैशिष्ट्यज्ञानं तथा च
• वह्निव्याप्यो धूमः पर्वत इत्याकारकं व्याप्यविशेष्यकं पक्षप्रकारकज्ञानमित्यर्थः। प्राचां तु पक्षधर्मताज्ञानं तथा च
वह्निव्याप्यधूमः पर्वतवृत्तिरित्याकारकं ज्ञानमित्यर्थः। यद्वा साध्यव्याप्तस्येति पदं भावसाधनं साध्यव्याप्तिमित्यर्थः।।
पक्षधर्मताज्ञानं पक्षवृत्तित्वेन ज्ञानं तथा च पर्वतवृत्तिधूमो वह्निव्याप्य इत्याकारकं ज्ञानमित्यर्थः। तस्मादित्यादिना ता
दृशज्ञानस्यैव पूर्वानुमितिजनकपरामर्शत्वाभिधानादित्याहुः। साध्यव्याप्यवदिति। साध्यव्याप्तिविशिष्टपक्षप्रकार
कं पक्षविशेष्यकज्ञानमित्यर्थः। विषयाधिक्याभावेपि कारणतावच्छेदकताघटकविषयाधिक्यात्। न चैवं केवलान्व

यिन्यसामानाधिकरण्यांशविषयत्वस्याधिकस्य कारणतावच्छेदककोटौ निवेशे न गौरवादित्यर्थः। न चेदं तो साध्यसा
मानाधिकरण्यस्य संशये व्यतिरेकनिश्चये वानुमित्यापत्तिरिति वाच्यं। साध्याभाववद्वृत्तित्वज्ञानस्यैव वह्नितावादिना तुर
मिवेष्टत्वात्। न चैवं पर्वतवृत्तिधूमव्यापको वह्निरिति ज्ञानाद्धूमसमानाधिकरणसमानाधिकरणो धूमवान् पर्व
त इति ज्ञानसत्त्वेप्यनुमितिः स्यादिति वाच्यं। साध्यसमानाधिकरणधर्मान्तरवत्ताग्रहस्यैव तस्यानुमितिप्रसाहादि
रोधित्वात्। न चैवं वह्निव्याप्यधूमवान् पर्वत इति ज्ञानात् कथमनुमितिरिति वाच्यं। लाघवाद्व्यापकतापरामर्शस्यैव हे
तुत्वे सिद्धे तत्राप्यन्तरा तत्कल्पनात्। पर्वतवृत्तिधूमव्यापको वह्निरिति शाब्दादिपरामर्शस्थले त्वमाप्यन्तराव्यापक
परामर्शस्य कल्पनीयत्वात्। न चाप्रसिद्धसाध्यकव्यतिरेकिणि साध्यविशेष्यकपरामर्शासम्भव इति वाच्यं। सा
ध्याभावस्य भावात्मकस्य व्यापकतया हेत्वभावावगाहिपरामर्शस्यैव तत्र पक्षधर्महेतुत्वकल्पनात्। तवापि तत्र व्या
प्यत्वपरामर्शासम्भवादिति भावः। ननु व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानं नानुमितिहेतुः किंतु साध्यवदन्यावृत्ति
त्वरूपतज्ज्ञानं तथा च गौरवं तदवस्थमत आह। अत एवेति। यतो व्यापकताज्ञानं कारणमत एवेत्यर्थः। साध्यायोगव्यवच्छेदे
नेति अभेदे तृतीया वह्न्ययोगव्यवच्छेदकरूपा वह्निनिष्ठधूमव्यापकता प्रदर्श्यत इत्यर्थः। वह्न्ययोगव्यवच्छेदश्च वह्निनिष्ठ

मसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वायोगव्यवच्छेदः वह्निनिष्ठतादृशावच्छित्त्ववत्त्वमिति यावत् केचि
त्तु सहार्थे तृतीया तथा च वह्न्ययोगव्यवच्छेदेन सह वह्निनिष्ठधूमव्यापकव्यापकता प्रदर्श्यते इत्यर्थः। वह्न्ययोगव्यव
च्छेदश्च वह्निमद्देश इत्याहुः। ननूदाहरणवाक्यात् कथं व्यापकत्वलाभः तस्यापदार्थत्वादिति चेत् अत्र केचित् धू
मवत्ति धूमव्यापकत्वविशिष्टाभेदसंबंधेन वह्निमतोऽन्वयात् संसर्गमर्यादया वह्नौ धूमव्यापकत्वलाभः। वह्निमद्दे
श्यवह्निरूपा वीप्सा च तात्पर्यग्राहिकेत्याहुः। तदसत् संसर्गतया व्यापकताज्ञानस्य परामर्शानुपयोगितया तस्य देशेन
स्यव्यर्थतापत्तेः वस्तुतस्तु वह्निवाचकपदस्य धूमव्यापकवह्नौ लक्षणा धूमवत्त्वाभेदसंबंधेन धूमव्यापकवह्निमतो
ऽन्वयो वह्नौ अभावश्चैव धूमव्यापकत्वलाभः वीप्सा च तात्पर्यग्राहिकेति तत्त्वं। अन्यथेति यदि साध्यवदन्यावृत्तित्वज्ञा
नं कारणं तदेत्यर्थः। अन्ययोगेति। अन्ययोगव्यवच्छेदः साध्यवदन्यावृत्तित्वव्यवच्छेदः। बोधकत्वं तृतीयार्थः तथा च सा
ध्यवदन्यावृत्तित्वबोधकमुदाहरणस्वरूपं स्यादित्यर्थः। ननु यदि हेतुनिष्ठव्याप्तिज्ञानं तत्र तदा तद्धि घटना यहेतुनिष्ठ
तया हेतोर्बोद्धव्यं न स्यात् किंतु साध्यनिष्ठतयैव तद्बोद्धव्यं न स्यादित्यत्र प्रापत्तिमाह होमोपीति आदिना व्याप्य
त्वासिद्धिपरिग्रहः। न पक्षधर्मव्यापकमिति न हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं साध्यतावच्छेदकमित्यर्थः।

एतन्न्व समानाकारकज्ञानस्यैव प्रतिबंधकत्ववादिनव्यमतमाश्रित्योक्तं प्राचांमते हेतौ साध्याभाववद्वृत्तित्वबुद्धेर
पि हेतुव्यापकताधीविरोधित्वादिति मंतव्यं। परामर्शीयेति अनुमितिहेतुरिति शेषः। पर्वतधूमे प्रतीतिः। वह्नौ पर्वतत्व
त्वरूपेण धूमव्यापकतावच्छेदकविषयत्वस्येत्यर्थः। पर्वतधूमसामानाधिकरण्यनैयत्यात्। वह्नौ पर्वतीयधूम
सामानाधिकरण्यविषयत्वव्याप्यत्वात्। पर्वतवह्निरिति अन्यत्र पर्वतीयधूमसामानाधिकरण्यविरहादित्यर्थः।
किमनुमित्यमिति। तथा च सिद्धसाधनमिति भावः। मानेन विषयित्वं साध्यसामानाधिकरण्येति पर्वतीयधूमसाध्यसा
मानाधिकरण्यविषयित्वं नियतमित्यर्थः। व्याप्यत्वमानेऽपि व्याप्यत्वपरामर्शस्यानुमितिहेतुत्वेऽपि सिद्धसाधनात्तु
मितेरसंभवित्वं तुल्यं अवगम्यते परामर्शेन विषयीक्रियते ननु विशेषाकारेण पर्वते वह्निसिद्धिरतो नासिद्धसाध
नमिति शेषः व्यापकत्वे व्यापकतापरामर्शानुमितिहेतुत्वेऽपि किंच वह्नौ पर्वतत्वरूपेण धूमव्याप्यव्यापकताविशेषत्वस्यव
ह्नौ पर्वतधूमसामानाधिकरण्यविषयित्वव्याप्यत्वमिवासिद्धमित्याह। वस्तुतस्त्विति। तद्वन्निष्ठेति धूमवन्निष्ठेत्यर्थः। ननु धू
मसामानाधिकरण्यं। ननु वह्निनिष्ठपर्वतीयधूमसामानाधिकरण्यघटितं। येन यथोक्तव्यापकत्वविषयत्वं तद्विषयकत्वव्याप्यं
स्यादिति भावः। सामानाधिकरण्यविशेषः नियतसामानाधिकरण्यं। मानसएवेति वह्नीतिं द्रियाजन्य एवेत्यर्थः। सर्वत्र वह्नि

रिंद्रियासंनिकर्षे यथाश्रुतं तु न संगच्छते शब्दादिकेऽपि परामर्शसंभवात् यत्र साध्येन समं चक्षुरादिसंनिकर्षस्तत्र चक्षुरादि
नापि परामर्शसंभवाच्च। चक्षुरन्वयेति चक्षुरसंनिकृष्टस्थलेऽपि क्वचित् चक्षुरन्वयस्येति चक्षुरन्वयव्यतिरेकानुधावनं
चेत्यर्थः। उपक्षीणत्वं उपनयेनान्यथासिद्धं। अथेति उपसर्जनतया विशेषणतया प्राधान्येन विशेष्यत्वेन। तथात्वमिति
पक्षविशेष्यकत्वमित्यर्थः। अन्यथेति यद्युक्तनियमस्तदेत्यर्थः। पक्षविशेष्यकत्वनियम इति। प्रसिद्धसाध्यकानुमितेः पक्ष
विशेष्यकत्वनियम इत्यर्थः। व्याप्यविशेष्यकपरामर्शाज्जायमानायास्तादृशानुमितेरेवोक्तनियमबलेन पक्षविशेष्यकत्वानुप
पत्तेः जनकीभूतज्ञाने पक्षस्योपसर्जनतयाभानात् तत्राप्यन्तरा पक्षविशेष्यकपरामर्शादनुमितिरिति चेन्न हि पक्षविशेष्यक
परामर्शस्यान्यस्याभावात् लिंगविशेष्यकपरामर्शात्तु हेतुर्वाच्यः स च न संभवति तत्र पक्षस्योपसर्जनत्वादिति भावः। ननु
कारणीभूतज्ञाने यद्विशेषणतयाभासते तत्कार्यभूतज्ञाने विशेष्यतातिरिक्तरूपेणाभासत इत्येव नियमः अतो न पक्ष
विशेष्यकपरामर्शात् पक्षविशेष्यकानुमित्यनुपपत्तिरित्यत आह न हीति तथा च [illegible] तथैव दंतत्वेति पुरुषस्य दंड इति ज्ञा
नजन्ये दंडी पुरुष इति ज्ञाने चेत्यर्थः। पक्षवृत्तिलिंगपरामर्शस्येति। पक्षलिंगोभयवैशिष्ट्यावगाहिपरामर्शस्येत्यर्थः। अयं स्व
भावः अयं नियमः स्यात् यदि विशेष्यविशेष्यिकानामपि विशेष्यिकानां न [illegible]थाभूतानां पक्षविशेष्यकानां। यो वह्निद्रोषसामग्रीविरहादि